माधवौ मधुवंशभवो। महतासैन्यसमहनाद नवान् वापुरभ्रैर्मूर्धरिपुभिस्थ्रागिंनपयेत्सदर्शनमात्रमेवाव ॥ णेभितिः
स्तुचितः ॥२०॥ परस्यानीकानि सैन्यानि तानि एवपयोमुचोमेघोसिषांशिलीमुखबाणाः तेषामन्तुल संवर्षितेनपी
डितं व्यस्तूर्जितं पतुर्जं भितवान् ॥२१॥ नदाहगहन त्रितिनिगादिषुधेः ध्यानरहन प्रथमानगुणं सदधनराणमाह
च्चनि शितवाणसमूहान् मुच्चन् निघ्नन् प्रहरन् पत्तिः पदातिः निरन्तरमितिगहनादिकियाविशेषण ॥ ज्वलन्कोपम्
२ जरासुतस्तावभिसत्यमाधवौ महाबलौ घनबली प्रसावरणेन ॥ मसैन्यपान ध्वजवाजिसारथिः स्पर्धी निलो
वापुरिवाभ्रैरणुभिः ॥२२॥ सुपर्णसालध्वजचोदितोरथावलक्षयं त्याहरिवामयोर्मिधे ॥ स्त्रियः पुरोटालकहृ
व्यरोपुरं समाश्रिताः संमुमुहुः ष्ठचारिताः ॥२४॥ हरिपरानीकपयोमुचां मुहुः शिलीमुखासुल्वणवर्षे
पीडितं ॥ स्वसैन्यमालोक्यसुरासुराच्छितं व्यस्फूर्जपङ्क्तिः शरासनो नृमं ॥२३॥ गहनं त्रिषंगादयसंदधनग्रा
रान्विहृष्यमुञ्चन् शितबाणपूगान् ॥ निघ्नन् स्थान् कुंजरवाजिपत्तीन् निरन्तरं यद्वदलानचक्रे ॥२६॥ नि
भिन्नकुंभाः करिणो निपेतू रनीकयोध्याः शरहृत्तकंधराः ॥ रथाहता श्वध्वजसूतनायकाः पदातयः छि
न्नभुजोरुकंधराः ॥२५॥ संछिद्यमानाद्विपदेभवाजिनां संगप्रसत्ताः प्रागपोसुरापगाः ॥ भुजाहृषाः कूर्मकषीवि
कृपाः हताद्विपदीप्रद्यगराकुलाः ॥२६॥

मरणपयाचक्रवद्भवनितहन् व्यस्फूर्जपीडितो ॥२४॥ हताः अश्वाध्वजाः सूताः नायकाः रथिनश्चयेसुते ॥२५॥ संछि
द्यमानाद्विपदाई भाव जिन श्वसेषांसंगोत्थः प्रसत्ताः ॥ असृक्लापगाः कषिरनद्यः परस्परं प्रवर्तिता इत्ता हता यत्राग्नेयः
प्रतिच्छिन्नदीरूपकमाह भुजा एव अहयोयासुताः पुरुषाणांशीर्षाण्येव कच्छपायासुताः ईनिहस्ताद्यपाश्वंतववाजिनश्चानि

नन्वल्पं वहं तव्यत्वाहं तदर्थं इति एतत्सदार्थं स्पष्टयति भूभारहरणायेति ६ अथ मत्तदर्थावतारं इत्युपलक्षण
मित्याह अन्ये पाति भगवतः उद्भवत ॥ १ ॥ तस्य तो सारथिमहितो परिच्छद ॥ परिकरः ध्वजकवचादिर्तस्य हितो ऽ
प्यभवत् नान्यो येषां तेहावंतः तेषां ॥ ३ ॥ देशीतो वेडकवचो ॥ ४ ॥ स्वायुधा शोभना युधसंपन्नो ॥ ६ ॥ पुरुषा अर्थ
एतदर्थावतारोहि भूभारहरणाय धर्म संरक्षणाय साधूनां कृतोन्येषां वधाय च ॥ ७ ॥ अन्योपि धर्मत्राणाय देहः
से निपतितमया विरमायाया धर्मस्य काले प्रभवतः क्वचित ॥ ८ ॥ एवं श्रापतितो गोविंदे प्राकाशान्स्पर्धवर्ष्मो ऽ स्या
वुपास्थितो सद्यः सम्स्नेतो सपरिच्छदो ॥ ९ ॥ आयुधानि च दिव्यानि पुराणानि यदृच्छया ॥ दृष्ट्वा तानि हृषीकेशः संकर्ष
णमथाब्रवीत ॥ १२ ॥ पश्यार्यव्यसनप्राप्तं यदूनां [illegible] त्वं नताप्रभो ॥ एतन्नेरथं प्रायातोदयितान्यायुधानि च ॥ १३ ॥ यान
मास्थाय तं द्योतद्व्यसनात् स्वान्समुद्धर ॥ एतदर्थं हि नौ जन्म साधूनामीशराम्भिक्षत ॥ १४ ॥ त्रयोविंशात्यतः कोऽस्य
भूमेभारमपाकुरु ॥ एवं संमंत्र्य दाशार्हौ दिव्यौ तौ रथिनो पुरात ॥ १५ ॥ निर्जग्मतुः स्वायुधाढ्यौ वलेनाल्पीयसा वृतौ
॥ शंखं दध्मौ विनिर्गत्य हरिर्दारुकसारथिः ॥ १६ ॥ ततो भूत्परसैन्यानां हृदि देव त्रासवेपथुः ॥ तावाह मागधो वीक्ष्य हे
हे हसपुरुषाधम ॥ १७ ॥ न त्वया योद्धुमिच्छामि वालेनैकेन लज्जया ॥ गुप्तेन हि त्वया मंद न योत्स्ये याहि बंधुहन् ॥ १८ ॥ तव
राम यदि श्रद्धा युध्यस्व धैर्यमुद्वह ॥ हित्वा वा मच्छरैश्छिन्नं देहं स्वर्याहि मां जहि ॥ १९ ॥ श्रीभगवानुवाच नैवमर्हसि वि
कत्थनेदर्शयेत्पौरुषं ॥ न गृह्णीमो वचो राजन्नातुरस्य मुमूर्षतः ॥ २० ॥ ॥ ॥ ॥ ॥
मा [illegible] स्मादिति वासवोधः हे पुरुषोत्तमेति ॥ १ ॥ गुप्तेन सर्वोतरवर्तिनामर्हसीत्याह अभंदव श्राग्नेति विंधशविद्यानां हती
त्तितथाहे अविद्यानिरसनेति वाहि प्राप्नुहि ॥ २ ॥ अच्छेद्यदेहो सावित्ति स्वमेवम वापस्तात्तरमा ॥ यद्वा मां जहि
हि ॥ १९ ॥ येयास्मन्नापि मह [illegible] न भगवत उत्तरं नैवमर्हसि इति विकत्थनेम्लायेते ॥ २० ॥ श्रीरामाय नमः श्रीरामाय नमः

प परितोषाय २

८०३ पवित्रार्थानि धर्म्मोपदेशापरादिति यदानियेषुनैर्वाक्यैः नयनैर्नीतिभिः प्राद्भवैः लौकिकैः सत्रलौकिकन्यायमाहुः स्वकार्म्म
नियदुभिरल्पकैः कृचालेमहता पराभवः केवलंकर्मबंधनेनवप्राप्तः प्रसस्वयानलजलव्याप्तिभावः ३३ वाहदुष्ठोजरा
संधः ३५ मुकुंदोपिपयाविन्यनुषंगः नहतंवलंयस्यसः तस्यैवामहदृष्ट्या हतंयुनितंसधाना इतिभावः ३ निस्तीर्णप्रैनाया
सेनैवतीर्णादिवलाएणवायिनमाधुसाधयन्ननुमोदितस्वात्सुघतेभिःपुरावासिभिः जनैर्वाभिसंगम्यभिलिता ३ तेदाचप्रमो

वाक्यैः पवित्रार्थपदैर्नयमैः प्राकृतैरपि ॥ स्वकर्मबंधप्राप्तोयं यदुभिस्तोयराजयः ॥ ३४ ॥ श्रीछक उवाच ॥ हतेपुसर्वानीके
३ घुन्दोवाहद्रथस्तदा ॥ यपेस्ततोभगवतामग्राधान् दर्शनायवै ॥ ३५ ॥ मुकुंदोप्यहतवलो निस्तीर्णारिवलार्णवः ॥ वि
कीर्यमाणः कुसुमैस्त्रिदशैरनुमोदितः ॥ ३६ ॥ माथुरैरुपसंगम्यविज्वरैर्मुदितात्मभिः ॥ उपगीयमानविजयः सूतमाग
धवंदिभिः ॥ ३७ ॥ शंखदुंदुभयोनेदुर्भेरीतूर्याण्यनेकशः ॥ वीणावेणुमृदंगानि पुरंप्रविशतिप्रभौ ॥ ३८ ॥ सिक्तमार्गा
हृष्टजनां पताकाभिरलंकृतां ॥ निर्घुष्टांब्रह्मघोषेण कौतुकावद्धतोरणां ॥ ३९ ॥ निचीयमानोनारीभिर्माल्यदध्य
२ क्षतांकुरैः ॥ निरीक्ष्यमाणः सस्नेहं प्रीत्युत्कलितलोचनैः ॥ ४० ॥ आयोधनगतं वित्तमनंतं वीरभूषणं ॥ यदुराजाय
तत्सर्वं प्राहृतंप्रादिशत्प्रभुः ॥ ४१ ॥ एवंसप्तदशकृत्वस्तावत्यक्षौहिणीबलः ॥ युयुधेमागधोराजायदुभिःकृष्णपालितैः ॥ ४२ ॥

पुरंप्रविशतिसतिशंखवाद्यानेदुः कथंभूतंपुरंतदासिक्तमार्गामिति ॥ ब्रह्मघोषेण वेदघोषेण निर्घुष्टां निनादितां कौतु
कनोत्सवेनासर्वितोवद्धानियंत्रितानितोरणानियस्यां ॥ ३९ ॥ नीचीयमानविकीर्यमाणः प्रविवेशेतिएवंसर्वत्रानुषंगः ॥ ४१ ॥ आयोधनेर
णभूमिस्तत्रस्थंवाजंवीराणांभूषणरूपं ॥ ४१ ॥ तावतीतिच्छेदः तावति पराजये वर्त्तमानेपि प्रत्यक्षौहिणीबलंयस्यसः स

३

करागुर वक्रमीनाग्रा युता: नराणां केशा: शुद्धेवले पानुत्ता: धनुं ध्वजतं गा: आयुधाऐश्वर्य गुल्मातेश्च संकुला: प्रथु
रिकाश्च र्म्माणि चक्राणि च तान्येवावर्त्तास्तै र्भयानकाभ्यहाम्मलीनां पृथ्वि वेकातदम्भा: प्राभरणानि च पयापयं:
प्रस्मानः शार्करास्य पांसुवा: ॥ २७ ॥ भीरूणां भयावहा: मनिस्विनां हर्षकार्य्य: किंच संकर्षणेनापितद्दलं तपेप्र:
णा तो ॥ २८ ॥ प्रगह्राजवर्णि ववहुग्मी मंभेर वं भयंकेरंचपत्त: दुरत्तपारं प्रेनोत्तालंपारमवधि: दु:शब्दो निषेध

करोक्रमीनानरकेशशैवला धनुस्तरंगायुधगुल्म संकुला: ॥ प्रथुरिकावर्त्त भयानकामहामणिप्रवेकाभरणा
स्मशार्करा: ॥ २७ ॥ प्रवाजेताभीरू भयावहामर्धेमनस्विनां हर्षकरा: परस्परं ॥ विनिघ्नतारीन्र मुशलेन दुर्मदा:
संकर्षणेनापरिमेयतेजसा ॥ २८ ॥ वलं तदंगार्णवदुर्गभैरवं दुरंतपारं मगधेंद्रपालितं ॥ तपंप्रणीतं वसुदे
वपुत्रयोर्विक्रीडितं तज्जगदीशयो: परं ॥ २९ ॥ स्थित्युद्भवांतं भुवनत्रयस्य य: समीहतेनंतगुण: स्वलीला
या ॥ न तस्य चित्रं परपक्ष निग्रहस्तथापि मर्त्यानुविधस्य वर्ण्यते ॥ ३० ॥ जग्राह विरथं रामो जरासंधं महा
वलं ॥ हतानीकावशिष्टासुं सिंह: सिंहमिवौजसा ॥ ३१ ॥ बध्यमानं हतारातिं पाशैर्वारुणमानुषै: ॥ वारयामा
सगोविंद: तेन कार्य्यचिकीर्षया ॥ ३२ ॥ स मुक्तो लोकनाथाभ्यां व्रीडितो वीरसंमत: ॥ तपसे कृतसंकल्पो वारित:

विक्रमेणागाधं देशातस्य निरवधिकमित्यर्थ: किंच मगधेंद्रेण चपालितं वलं देवं ... सयो: ... तत्सरके
वलं तयो विक्रीडितं न तु पराक्रम: ॥ २९ ॥ न चैतदाश्चर्यमित्याह स्थित्युद्भवांतमिति तिनाऽऽहेति मित्या ... इति तत्र
हतयापीति मर्त्यानुविधेनानुकरोतीति मर्त्यानुविधस्तस्य ॥ ३० ॥ जग्राहेति हतान्यनीकानि यस्यावशिष्टा ... वय
स्यतेयतं ॥ ३१ ॥ हतावहुर: ... तमपिजरासंधं वध्यमानं वारयामासेति ॥ ३२ ॥

द॰उ॰

राजतारकूटे॰ रजतंच आरकूटं चयोस्तत्ताभ्यां निर्मिते कोष्ठे प्रस्थशालादिभिः कथं भूतैर्हेमकुंभैरलंकृते तयार
त्नकूटैः क्लृप्तागारादिभिः खचिते हेम्नि सौवर्णे महामरकतमयानि स्थालानि येषु तेषु गृहेषु ॥ ५३ ॥ केचन गृहे गृहे दोवासो याती
नां देवानां च गृहेषु वलभी भित्ति प्रघाणानि तानि भित्तिनिर्मितानि ॥ यद् देव गृहे राजगृहे क्लृप्तानि शोभमानं ॥ ५४ ॥ पारिजातं च प्रा
हृता त प्रस्थापयो मासे तिष्ठ कपौरविलसवादात्तत्वे भावि चात्तत्तानि दैवाः मर्त्यधर्म्माः क्षुत्पिपासादिषडूर्मिभिः निघप

४

राजतारकूटेः कोष्ठेः हेमकुंभैरलंकृतैः ॥ रत्नकूटैर्गृहैर्हेमैर्महामरकतस्थले ॥ ५३ ॥ वास्तोष्पतीनां च गृहैर्वलभीः
भित्तिनिर्मितैः ॥ चातुर्वर्ण्यजनाकीर्णं यदुदेवगृहोल्लसत् ॥ ५४ ॥ सुधर्म्मा पारिजातं च महेंद्रः प्राहिणोद्धरेः ॥ यत्र चावस्थि
तो मर्त्यो मर्त्यधर्म्मैर्न युज्यते ॥ ५५ ॥ श्यामैककर्णान्वरुणो हयान्शुक्लान्मनोजवान् ॥ अष्टौ निधिपतिः कोशान् लो
कपालांनितोदयान् ॥ ५६ ॥ यद्यद्भगवता दत्तमाधिपत्यं स्वसिद्धये ॥ सर्वं प्रत्यर्पयामासुर्हरौ भूमिगते नृप ॥ ५७ ॥ तत्रयो
गप्रभावेन नीत्वा सर्वजनं हरिः ॥ प्रजापालेन रामेण कृष्णः समनुमंत्रितः ॥ ५८ ॥ निर्जगाम पुरद्वारात् पद्ममा
ली निरायुधः ॥ ५९ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे दुर्गनिवेशने नाम पंचाशत्तमो ध्यायः ॥ ५० ॥ ॥
पद्मोप लक्षपालनासाज गाम वरूपी जनं १

यो
नि॰ कुबेरः अष्टौ कोशान्निधान ॥ महापद्मं महापद्मामत्स्यकूर्मातंदक ॥ नीलो मुकुंदः शंखश्च निधयो ष्टौ प्रकी ४
र्त्तिताः ॥ इति प्रसिद्धान् निजोदयान् निज विभूतां ॥ ५६ ॥ अन्ये च सिद्धादयो भगवता स्वाधिकारसिद्धये पद्मदाधिप
त्यं दत्तमासीत् तत्सर्वं प्रत्यर्पयामासुरित्यर्थः ॥ ५७ ॥ यथा कालयवनागमन तिन चासौ जनः तथा योगप्रभावेन नीत्वा च
त्र स्थितश्चापज्ञो पालयः अहं पालयिष्ये इति समनुमंत्रितः कृष्णः ॥ इति दशमे पंचाशत्तमः ॥ ५० ॥ ॥ श्री श्रीराम ॥

॰अक्षिप्एवन क्षयं निस्यु ॥४३॥ ॰प्रष्टादशमे ॰प्रष्टादशे संग्रामे भाव्येन नस्य घे ॰अकस्मात्कालपवनः प्राप ॥४४॥ ॰प्राप्त समितान्स्वतल्पात्
॥४५॥ अजिनं दृष्ट्वा भयतः पवनाजरासंधाश्च ॥४६॥ तदा हृष्टपेन निरुधे निकरण्डि ॥४७॥ ॰पृष्य ॰पुनेन ॥४८॥ समुद्रमध्ये दुर्गीतन्मध्ये
नगरं कृत्स्नोद्भुतसर्वाश्चर्यमयं ॰प्रश्नीकरत कारयामास ॥५०॥ तुष्टो विश्वकर्मा तदा पं पिल्यनैपुणा यत्रिप्राकारो लतं तदा हसा
दैस्त्रिभिः रथ्येति रथ्याराजमार्गाः पुरतः वीथ्युपमार्गाः पश्चिमतः उभयतोपि च तु शराणि गणानि नन्स घेकोष्टाः ततोपतःसुउ

॰अक्षिप्एवं स्तदलं सर्वं दृष्टमयः हे स्मेरजघः ॥ हतेषु स्वेषु घनीकेषु त्यक्त्वा शादीर्भिर्नृप ॥४३॥ ॰प्रष्टादशमे संग्रामे ॰आगामिनि ॰
तदंतरा ॥ नारदप्रेषितो वीशि पवनः प्रत्यहूशत ॥४४॥ कृतो धर्मस्तुसमैन्यामिस्ट भिर्मिले प्रुकोटिभिः ॥ नलोके चाप्रतिहतो
हृष्टान्सुत्वान्मसंभितान् ॥४५॥ नं दृष्ट्वा चिंतपरः कृष्णः संकर्षणसहायवान् ॥ प्रहोपदूनाहृजिनं प्राप्य भयतो महत्
॥४६॥ पवनोयं निरुंधे स्मान् ॰प्रद्यतावन्महावलः ॥ मागधाप्येद्य वा स्थावा परस्थो वा गमिष्यति ॥४७॥ ॰प्रावयोर्युद्धा
तोरस्य यद्यागतो जरासुतः ॥ वधूर्न्वधिष्यत्यथ वा नोष्यतेस्वपुरं वली ॥४८॥ तस्माद्द्य विधास्यामो दुर्गं द्विपदुर्गमं ॥ तं
स्रातीनसमाधाय पवनं घातयामहे ॥४९॥ इति संमंत्र्य भगवान् दुर्गं द्वादशयोजनं ॥ प्रंतः समुद्रं नगरं कृत्स्नाद्भुतमची
करत् ॥५०॥ हर्म्यतोयत्रहिहाष्ट्रा विशो नंपिल्य नैपुणां ॥ रथ्याचनरवीथीभिर्यथावास्तुविनिर्मितं ॥५१॥ सुरद्रुमलता
द्यानविचित्रोपवनान्वितं ॥ हेमस्तंभेर्दिविस्पर्शिभिः स्फाटिकाट्टालगोपुरैः ॥५२॥ ॥ प्रासादा सोहा यत्र ॥

वर्णिभवनानि मदुपरिस्फाटिकाट्टालिका नदुपरिहेमकुंभाः इति यथावास्तु शब्दादि निर्माणस्थानं नमनं तिक्रम्य विनिर्मि
ने ॥५१॥ सुरद्रुमालतास्वयंयषतान्युद्यानानि विचित्रोपवनानि चैतैरन्वितं हेमस्तंभानि यत्र शालि येषां ते दिविस्पर्शिभिः
॰प्रत्यु च्चैः स्फाटिकाः ॰प्रट्टालाः उपरिभ्रामकाः गोपुराणि च ॥ पुरद्वाराणि तेनोन्नितामस्तुत्तरेणान्वयः ॥५२॥ ॥

नेशयन्नमच्युतं मत्वाताडयदिति ॥२१॥ तस्य क्रुद्धस्य दृष्टिपातेन संदीप्तो यः स्वदेहजो ऽग्निस्तेन ॥२२॥२३॥ यवनमर्दयतीति यव
नार्दनः यथा सकस्य वंशः किंवीर्यः कीदृक्प्रभाववान् किंतेजः कस्य वीर्यपुत्रः इत्यर्थः शिष्ये शेते स्मेत्यपि ॥२४॥ सत्यः संगरो युद्धं

५ इति मत्वाच्युतं मूढस्तं पदा समताडयत् ॥२१॥ स उत्थाय चिरं सुप्तः शनैरुन्मील्य लोचने ॥ दिशो विलोकयन्पार्श्वे तमद्राक्षीदव
स्थितं ॥२२॥ स तावत्तस्य रुष्टस्य दृष्टिपातेन भारत ॥ देहजेनाग्निना दग्धो भस्मसादभवत्क्षणात् ॥२३॥ श्रीराजोवाच ॥ को नाम
स पुमान्ब्रह्मन्कस्य किंवीर्य एव वा ॥ कस्माद्गुहां गतः शिष्ये किंतेजो यवनार्दनः ॥२४॥ श्रीशुक उवाच ॥ स इक्ष्वाकुकुले जा
तो मांधातृतनयो महान् ॥ मुचुकुंद इति ख्यातो ब्रह्मण्यः सत्यसंगरः ॥२५॥ स याचितः सुरगणैरिंद्राद्यैरात्मरक्षणे ॥ असुरेभ्यः
परित्रस्तैस्तद्रक्षां सोऽकरोच्चिरं ॥२६॥ लब्ध्वा गुहं ते स्वःपालं मुचुकुंदमथाब्रुवन् ॥ राजन्विरमतां कृच्छ्राद्भवान्नः परिपाल
नात् ॥२७॥ नरलोके परित्यज्य राज्यं निहतकंटकं ॥ अस्मान्पालयतो वीर कामास्ते सर्व उज्झिताः ॥२८॥ सुता महिष्यो भ
वतो ज्ञातयोऽमात्यमंत्रिणः ॥ प्रजाश्च तुल्यकालीना नाधुना संति कालिताः ॥२९॥ कालो बलीयान्बलिनां भ
गवानीश्वरोऽव्ययः ॥ प्रजाः कालयते क्रीडन्पशुपालो यथा पशून् ॥३०॥ वरं वृणीष्व भद्रं ते ऋते कैवल्यमद्य
नः ॥ एक एवेश्वरस्तस्य भगवान्विष्णुरव्ययः ॥३१॥ ५

प्रतिज्ञा वा यस्य सः ॥२४॥२५॥ गुहं कार्तिकेयं स्वःपालं स्वर्गपालकं सेनान्यं ॥२६॥ उज्झितास्त्यक्ता गता इत्यर्थः ॥२८॥ किंच सुता
इति तुल्यकालीनाः त्वत्समानकालीनाः कालिताः विचालिताः ॥२९॥ मंत्रिणः कोऽन्य कालयेदिति वदंत आह कालय
ते इतस्ततश्चालयति ॥३०॥ तस्य कैवल्यस्य ॥३१॥

एकपंचाशत्तमेऽहन्यचुकुंददृष्टशाहोरिः ॥ पवनं मुचुकुंदेन स्तुतः सन्नन्वकंपत ॥ १ ॥ पवनेंद्रसुतान्तकालपवनाद्युभीषणा
दुरितद्विरदः स्वैरः पालनीय पलायत ॥ २ ॥ पद्मशार्ङ्गिः प्रपालेनरेशं तं इत्युक्तस्तदा पादवेकपहासितः कुतोसौ श्रीमहेशप्रसाद्यद्
भीषणं पुत्रवरं लघुवान् तस्य पवनेंद्रेणाप्युत्रेण स्वदत्तेप्युत्रोत्पादनाय प्रार्थिताशार्ङ्गिः कोलपवनमजीजनत इति पुराणप्र
सिद्धं पुरुद्वाराद्विनिःक्रांतं जिहानमुद्भवेत ॥ १ ॥ २ नित्यप्रमुदितमित्यादिमुखारविंदविशेषणं ॥ ३ ॥ ४ ॥ नारदोक्तैरतैलिंदाणेः प्र

श्रीशुक उवाच ॥ सं विलोक्य विनिःक्रांतं मुजिहानमिवोडुपं ॥ दर्शनीयतमं श्यामं पीतकौशेयवाससं ॥ १ ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभा
मुक्तकंधरं ॥ पृथुदीर्घचतुर्बाहुं नवकंजारुणेक्षणं ॥ २ ॥ नित्यप्रमुदितश्रीमत्सुकपोलशुचिस्मितं ॥ मुखारविंदं बिभ्राणं स्फुरन्मक
रकुंडलं ॥ ३ ॥ वासुदेवो ह्ययमिति पुमान् श्रीवत्सलांछनः ॥ चतुर्भुजोऽरविंदाक्षो वनमाल्यतिसुंदरः ॥ ४ ॥ लक्षणैर्नारदप्रोक्तैर्ना
ति न्यो भवितुमर्हति निरायुधश्चलन्पद्भ्यां योत्स्येऽनेन निरायुधः ॥ ५ ॥ इति निश्चित्य यवनः प्राद्रवंतं पराङ्मुखं ॥ अन्वधावज्जिघृक्षुस्तं
दुरापमपि योगिनां ॥ ६ ॥ हस्तप्राप्तमिवात्मानं हरिणा स पदे पदे ॥ नीतो दर्शयता दूरं यवनेशोऽद्रिकंदरं ॥ ७ ॥ पलायनं यदुकु
लजातस्य तवनोचितं ॥ इति क्षिपन्ननुगतो नैनं प्रापाहताशुभः ॥ ८ ॥ एवं क्षिप्तोऽपि भगवान् प्राविशद्गिरिकंदरं ॥ सोऽपि प्रविष्ट
स्तत्रान्यं शयानं ददृशे नरं ॥ नन्वसौ दूरमानीय शेते मामिह साधुवत् ॥ ९ ॥ ॥ ॥ ॥ ॥ ॥

यं पुमान्वासुदेव एव नान्यो भवितुमर्हति ॥ अयं च निरायुधः ॥ अनेनान पद्भ्यामेव चालितनिरायुधोऽहं योत्स्यामि ॥ ५ ॥ ६ ॥ शतं निश्चि
त्य तं पराङ्मुखं प्राद्रवंतमन्वधावदित्यन्वयः ॥ आत्मानं हस्तप्राप्तमिव दर्शयता दूरं नीत इत्यन्वयः ॥ ७ ॥ अकृताशुभः ॥ अक्षीण
कर्मा ॥ ८ ॥ ९ ॥ ॥

मां प्रपन्नो जनः कश्चिन्न भूयोर्हति शोचितुं ॥ श्रीशुक उवाच इत्युक्तस्तं प्रणम्याह मुचुकुंदो मुदान्वि- तः

द०उ० क्वचित्कदाचित्क्षयिष्यधिपार्थिवानां स्यापि विममे गणितवान् तथापि न जन्मानि कर्माणि गुणादीनि च गणितानीति ॥ नेतितामच पा
निमित्तेन मयैव ॥ ॥४२॥ प्रपन्नं हि मामिति शोचितुं यदान्यैर्दत्तेषु वरेषु क्षीणेषु शोचति नैवं मम प्रपन्नः सन् दत्तवराणां मत्तोऽपि
त्यादिति भावः ॥४४॥ श्रद्धा विश्वसिति मे पुरो मम वार्ता विर्ष्यतीति वृद्धगर्गवाक्यमनुस्मरन्नित्यर्थः ॥४५॥ स्वर्ग ... केवलं दु

तेजसाते विषह्येन भूरि द्रष्टुं न शक्नुमः ॥ हतौजसो महाभाग माननीयोसि देहिनां ॥३५॥ एवं संभाषितो राज्ञा भगवान्भूतभा-
६ वनः ॥ प्रत्याह प्रहसन्वाण्या मेघनादगभीरया ॥३६॥ श्रीभगवानुवाच ॥ जन्मकर्माभिधानानि संति मेंग सहस्रशः ॥ न शक्यं-
तेनुसंख्यातुमनंतत्वान्मयापि हि ॥३७॥ क्वचिद्रजांसि विममे पार्थिवान्युरुजन्मभिः ॥ गुणकर्माभिधानानि न मे जन्मानि कर्-
हिचित् ॥३८॥ कालत्रयोपपन्नानि जन्मकर्माणि मे नृप ॥ अनुक्रमंतो नैवांतं गच्छंति परमर्षयः ॥३९॥ तथाप्यद्यतनान्यंग
शृणुष्व गदतो मम ॥ विज्ञापितो विरिंचेन पुराहं धर्मगुप्तये ॥४०॥ भूमेर्भारायमाणानामसुराणां क्षयाय च ॥ अवतीर्णो
यदुकुले गृह आनकदुंदुभेः ॥४१॥ वदंति वासुदेवेति वसुदेवसुतं हि मां ॥ कालनेमिर्हतः कंसः प्रलंबाद्याश्च सद्द्विषः ॥४२॥ अ-
यं च यवनो दग्धो राजंस्ते तिग्मचक्षुषा ॥ सोहं तवानुग्रहार्थं गुहामेतामुपागतः ॥४३॥ प्रार्थितः प्रचुरं पूर्वं त्वयाहं भक्तवत्सलः ॥
वरान्वृणीष्व राजर्षे सर्वान्कामान्ददामि ते ॥४४॥ ज्ञात्वा नारायणं देवं गर्गवाक्यमनुस्मरन् ॥ मुचुकुंद उवाच ॥४५॥ विमो-
हितोयं जन ईश मायया त्वदीयया त्वां न भजत्यनर्थदृक् ॥ सुखाय दुःखप्रभवेषु सज्जते गृहेषु योषित्पुरुषश्च वंचितः ॥४६॥

भाकाभास्तु छानवरणयोग्या इत्याशयेन । भक्तानां संसारमष्टभिः प्रपद्य मन्सोऽतिविमोहित इति हेतुमायोपित पुरुषश्च
तिक्विविधो प्रपन्नो जनः सदा पपाभायमपाविमोहितः प्रतः प्रत्ययेहक प्रार्थ्य परमार्थं सुखं हानमपश्यतीति तिमन्यः प्रतस्तांन भज- ६
ति किंतु परस्य परं वंचितः सन् सुखेव दुःखाद्... सज्जत इति ॥४६॥

गुहायां प्रविष्टस्तेन स्म ॥ २१ ॥ धर्षितश्चाभिभूतः दुर्द्धर्षः प्रधर्ष्य ॥ २१ ॥ विधूतः स्पेलं ता पिगिरिगह्वरे दुःप्रवेशस्थाने ॥ तत्रापि मुचुकुंद
के पङ्कजापहा पलाशसदृशाभ्यां विचरसीति ॥ २५ ॥ तेजः मूर्त्तिः प्रभावादीन्निर्वा ॥ २६ ॥ सर्वेचापि तिलोषादहमन्यस्तत् पुरुषर्षभ

एवमुक्ताः सर्वे देवाः शक्राभिवेद्यमहायशाः ॥ प्रशापचिगुहां विष्टो निद्रयादेवदत्तया ॥ २१ ॥ स्वयं तपोगुहामध्ये बोधयंत्सामचे
तनः ॥ सद्यया दृष्टमात्रेस्तु भस्मीभवेत्सुतत्क्षणात् ॥ २२ ॥ एवं नभस्मसान्नीते भगवान्सात्वतर्षभः ॥ प्रात्मानंदर्शयामास मु
चुकुंदाय धीमते ॥ २३ ॥ तमालोक्य घनश्यामं पीतकौशेयवाससं ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभेन विराजितं ॥ २४ ॥ चतुर्भुजं
रोचमानं वैजयंत्या च मालया ॥ चारुप्रसन्नवदनं स्फुरन्मकरकुंडलं ॥ २५ ॥ प्रेक्षणीयं नरलोकस्य सानुरागस्मितेक्षणं ॥ प्र
पीव्यवयसं मत्तमृगेंद्रोदारविक्रमं ॥ २६ ॥ पर्य्यपृच्छन्महाबुद्धिस्तेजसा तस्य धर्षितः ॥ शंकितः शनकै राजा दुर्द्धर्षमिव तेजसा
॥ २७ ॥ मुचुकुंद उवाच ॥ को भवानिह संप्राप्तो विपिने गिरिगह्वरे ॥ पद्भ्यां पद्मपलाशाभ्यां विचरस्युरुकंटके ॥ २८ ॥ किं स्वि
त्तेजस्विनां तेजो भगवान्वा विभावसुः ॥ सूर्यः सोमो महेंद्रो वा लोकपालोपरोपि वा ॥ २९ ॥ मन्ये त्वां देवदेवानां त्रयाणां पुरुषर्ष
भं ॥ यद्बाधसे गुहाध्वांतं प्रदीपः प्रभया स्वया ॥ ३० ॥ शुश्रूषतामव्यलीकमस्माकं नरपुंगव ॥ स्वजन्म कर्म गोत्रं वा कथ्यतां यदि
रोचते ॥ ३१ ॥ वयं तु पुरुषव्याघ्र ऐक्ष्वाकाः क्षत्रबंधवः ॥ मुचुकुंद इति प्रोक्तो यौवनाश्वात्मजः प्रभो ॥ ३२ ॥ चिरप्रजागरः श्रांतो
निद्रयापहतेंद्रियः ॥ शयेस्मिन्विजने कामं केनाप्युत्थापितोधुना ॥ ३३ ॥ सोपि भस्मीकृतो नूनमात्मीयेनैव पाप्मना ॥ अनंतरं
भवान्श्रीमाँल्लक्षितोमित्रशासन ॥ ३४ ॥

भस्मीविष्णुगुहाध्वांतं श्रांतस्तम ॥ ३० ॥ ३१ ॥ वयं त्वितिवंशरूपाभिप्रायेण बहुवचनं तेषामहं मुचुकुंद इति युवनाश्वो मांधातुः

पिता ततो मांधाता यौवनाश्वः ॥ ३२ ॥ ३३ ॥ ३४ ॥

किंच कालात्मना भयाभिपन्नो देहः एवं भवतीत्याह पुरेति श्वसृगालादिभिर्भक्षितो विट्संज्ञितः भस्मसंज्ञितः कृमिसंज्ञि
तः दग्धो भस्मसंज्ञितो भवति बुद्ध्या विचार्य एवं भूते शरीरे ममतां कुर्वतो जनानाहविमोहो धेयंमितिश्चात्मानि श्चत्रुभूतान्
याः सन्ततं यतः ॥ जन्म सहस्रं बहून् गच्छ दुःखेन चेल ध्यापि च मानुषत्वं सुखं वा देहयेन भजन्ति विमूढा वैमनुष्याः आत्मन
शत्रुभूताः ॥ ५१ ॥ किंच श्रौतकप्राप्तेः प्रागपि दिग्विजयिनो यासोऽपि पार्थ तत्त्वं दुःखं तदवश्यमेवेत्यानिर्जित्येति श्वभ्रमनवि

पुरा स्थैर्यभ्रमपो वेस्त्रै नेश्वरान् भजंगजैर्वीनरदेव संज्ञितः ॥ स एव कालेन दुरत्ययेन ते । कलेवरो विट् कृमिभस्म
संज्ञितः ॥ ५८ ॥ निर्जित्य दिक् चक्रमभूतविग्रहो वरासनस्थः समराजवंदितः ॥ गृहेषु मैथुन्यसुखेषु योषितां क्री
डामृगः पुरुष ईशनीयते ॥ ५९ ॥ करोति कर्माणि तपः सुनिष्ठितो निवृत्तभोगस्तदपेक्षया ददत् ॥ पुनश्च भूयेयमहं
स्वराडिति प्रवृद्धतर्षो न सुखाय कल्पते ॥ ६० ॥ भवापवर्गो भ्रमतो यदा भवेत् जनस्य तर्ह्यच्युत सत्समागमः ॥
सत्संगमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते मतिः ॥ ६१ ॥

ग्रहः श्चविद्यमानसंग्रामः एवं यसमासे राजभिर्वंदितो पि मिथुनाभाव सुखमेवपरं येषु तेषु योषितां गृहेषु क्रीडामृग इव
शासितः नीयते ॥ ५९ ॥ किंच न चातितरामकलस्य न भोगक्षेपः कश्चिदस्तीत्याह करोतीति तपसि सुप्रधः शायन ब्रह्मचर्यादौ सुनि
ष्ठितः पुनश्च स्वराडिन्द्रः स्यामिति यद्वा न मानरेष्ववमेवचेन्न वर्त्तेत्स्यामिति तेरेवमष्टभिः श्लोकैः शरीरादिषु सुखानां संसारप्र
पंच भक्त्यानि निरन्तरं ममभवापवर्गेति मोक्षयत्न तोषतः संसरतो जनस्य यदा भवद्वर्ग हेतुर्भवस्य वधस्याप वर्गोतो भवे

किंच कामसुखं वस्त्रक शादिस्वपि संभवति भगवद्भजनं तु न मानुषव्यतिरेकेणेति ॥ मानुषत्वं प्राप्यत्वं प्राप्य त्वामभजन्नतिमूढ इहं
त्याह घेत्यादि प्रवचनकर्म भ्रमो प्रव्यग्र प्रविलंग किंचन्मसति विषयसुखे मति यस्य सः गृहमेवांधकूपस्तस्मिन्पतितः
यथा मेघस्फुरणे लुब्धो धकूपे पततीति ॥ ४७ ॥ नकेवलमस्य जन्मनैव गतिः किंतु ममापि तथैवेत्याह ममेति मत्स्य शरीर आत्म
बुद्धिर्यस्य जनस्य मम प्रत एव सुतादिषु आसज्जमानस्य ॥ ४८ ॥ उन्नयमदत्वं पर्चपंचपति कलेवर इति घटकुड्यादिसदृशो

लब्ध्वा जनो दुर्लभमत्र मानुषं कथंचिदव्यंगमयत्नतोनघ ॥ पादारविंदं न भजत्यसन्मतिर्गृहांधकूपे पतितो यथा पशुः ॥ ४७ ॥
ममैष कालोजित निःफलो गतो राज्यश्रियोन्नद्धमदस्य भूपतेः ॥ मर्त्यात्मबुद्धेः सुतदारकोशभूष्वासज्जमानस्य दुरं
तचिंतया ॥ ४८ ॥ कलेवरेस्मिन् घटकुड्यसन्निभे निरूढमानो नरदेव इत्यहं ॥ वृतो रथेभाश्वपदात्यनीकपैर्गांपर्यटं
त्वागणयन् सुदुर्मदः ॥ ४९ ॥ प्रमत्तमुच्चैरितिकृत्यचिंतया प्रवृद्धलोभं विषयेषु लालसं ॥ त्वमप्रमत्तः सहसा
भिपद्यसे क्षुल्लेलिहानोहिरिवाखुमंतकः ॥ ५० ॥
मो

अप्रनाम निपतितो पान एव बहुमहो भवं ॥ अतो ममैष कालो निःफलो गत इति ॥ ४८ ॥ त्वामगणयन् पर्यटन्नत्याह प्रम
त्तमिति प्रमत्तं मनवाहितं त्वामनवचिविगणय्य देहादिष्वासक्तमिति यावत् कुतः प्रमत्तं इति कृत्यचिंतया एवमेवं
करोथमिति मनरथपरं परया मनोरथे भोगेपि विषयेषु लालसं असक्तं प्रवृद्धोपि पुनः प्रवृद्धलोभं सद्ध्यायस्य
तं प्रतकस्त्वमभिपद्यसे अभिभवसीत्यर्थः क्षुधा संक्षिणो लेलिहानो हिरा खुं मूषकामिवेति ॥ ५० ॥

म२

राक्षसे युद्धहरणादिति स्मृतेः शत्रः प्रमथ्येति च यदुक्तं राक्षसेन विधानेनोपायेन परिणीतवानिति श्रुतं ॥१८॥ एवमेव सामा
न्यत एवं श्रुतं विशेषतस्तु श्रोतुमिच्छामि ॥१९॥ अवशेषेषु काम्याविः कर्षति ब्रह्मन्निति पुण्या महाफलाः माध्वीः श्रुतिसुखा

श्रीराजोवाच ॥ भगवान्भीष्मकसुतां रुक्मिणीं रुचिराननां ॥ राक्षसेन विधानेन उपयेम इति श्रुतं ॥१८॥ भगवन्श्रो
तुमिच्छामि कृष्णस्यामिततेजसः ॥ यथा मागधशाल्वादीन् जित्वा कन्यामुपाहरत् ॥१९॥ ब्रह्मन्कृष्णकथाः पुण्याः मा
२ ध्वीर्लोकमलापहाः ॥ को नु तृप्येत शृण्वानः श्रुतज्ञो नित्यनूतनाः ॥२०॥ श्रीशुक उवाच ॥ राजासीद्भीष्मको ना
म विदर्भाधिपतिर्महान् ॥ तस्य पंचाभवन्पुत्राः कन्यैका च वरानना ॥२१॥ रुक्म्यग्रजो रुक्मरथो रुक्मबाहुरनंतरः
रुक्मकेशो रुक्ममाली रुक्मिण्येषां स्वसा सती ॥२२॥ सोपश्रुत्य मुकुंदस्य रूपवीर्यगुणश्रियः ॥ गृहागतैर्गीयमा
नास्तं मेने सदृशं पतिं ॥२३॥ तां बुद्धिलक्षणौदार्यरूपशीलगुणाश्रयां ॥ कृष्णश्च सदृशीं भार्यां समुद्वोढुं मनो
7 दधे ॥२४॥ बंधूनामिच्छतां दातुं कृष्णाय भगिनीं नृप ॥ ततो निवार्य कृष्णद्विट् रुक्मी चैद्यममन्यत ॥२५॥ तद
वेत्यासितापांगी वैदर्भी दुर्मना भृशं ॥ विचिंत्याप्तं द्विजं कंचित् कृष्णाय प्राहिणोद्द्रुतं ॥२६॥ द्वारकां स समभ्येत्य प्र
तीहारैः प्रवेशितः ॥ अपश्यदाद्यं पुरुषमासीनं कांचनासने ॥२७॥ दृष्ट्वा ब्रह्मण्यदेवस्तमवरुह्य निजासनात्
उपवेश्यार्हयांचक्रे यथात्मानं दिवौकसः ॥२८॥ तं भुक्तवंतं विश्रांतमुपगम्य सतां गतिः ॥ पाणिनाभिमृशन्पा

वही लोकस्य मला मलापहाः अतः शृण्वानः शृण्वन्नित्यर्थः श्रुतज्ञः श्रुतसारवित् नित्यनूतनाः प्रतिक्षणमाश्चर्यवत् प्रती २
यमानाः चैद्यममन्यत तस्मै वरमित्यर्थः ॥२५॥ अवेत्य ज्ञात्वा असितापांगी कुनीलकटाक्षा कृष्णाय द्विजं प्रेष
यामास प्रतीहारैः द्वारपालैः ॥ आत्मानमिव [illegible] ॥२८॥ अभिमृशन् पादौ संमर्दयन् ॥२९॥

[illegible] ॥५०॥ ॥३०॥

निन्येन यत्नार्गिचलं निस्मै ॥५॥ वेगारंभसंवेगोद्रेकं ॥६॥ भीरुभीतवत् भीरो रथिभीतवत् ॥ प्रतिभीतवदित्यर्थः चेरतुः पलायेतां
वहुयोजनं देशं ॥७॥ प्रभ्रमाणो विभ्रमाणौ प्रयजातन्नवेत्तीति तया ॥८॥ तुंगएकादशयोजनोन्नतप्रकर्षेणवर्षतीत्यस्मिन्ऽ
तिप्रवर्षइत्याख्यायस्य तं तदा ह भगवानिंद्रः ॥१०॥ तत्र विचन्वन्नपि तयोः पदं निर्यलपस्थानमनधिगम्य ॥१२॥ ततो गिरेः दशवएकं

भगवान्नुनराबुञ्ज पुंशीपवनवेष्टिता ॥ हत्वा मेधेवलं निन्ये तदीयं दारकांधनं ॥५॥ नीयमाने धने गोभिर्नृभिश्चाच्युतचोदितैः प्राज
गाम जरासंधस्त्रयोविंशत्यनीकप ॥६॥ विलोक्य वेगरभसं रिपुसैन्यस्य माधवो ॥ मनुष्यचेष्टामापन्नो राजन् दुद्राव तुष्टिं
॥७॥ विहाय वित्तं प्रचुरं प्रभीतो भीरुभीतवत् पद्भ्यां पद्मपलाशाभ्यां चेरतुर्वहुयोजनं ॥८॥ पलायमानौ तौ दृष्ट्वा मागधः प्रह
सन्बली ॥ अन्वधावद्रथानीकैरीशयोरप्रमाणवित् ॥९॥ प्रद्रुत्य दूरं संश्रान्तौ तुंगमारुहतां गिरिं ॥ प्रवर्षणाख्यं भगवान् नि
त्यदा यत्र वर्षति ॥१०॥ गिरौ निलीनावाज्ञाय नाधिगम्य पदं नृप ॥ ददाह गिरिमेधोभिः समंतादग्निमुत्सृजन् ॥११॥ ततनुः
त्युत्पत्य तरसा दह्यमानादुभौ तटात् ॥ दशैकयोजनात्तुंगान्निपेततुरधो भुवि ॥१२॥ अलक्ष्यमाणौ रिपुणा सानुगेन यदूत्तमौ
स्वपुरं पुनरायातौ समुद्रपरिखां नृप ॥१३॥ सोपि दग्धाविति मृषा मन्वानो बलकेशवौ ॥ बलमाकृष्य सुमहन् मगधान्
मागधो ययौ ॥१४॥ आनर्ताधिपतिः श्रीमान् रैवतो रैवतीं सुतां ॥ ब्रह्मणा चोदितः प्रादाद्बलायेति पुरोदितं ॥१५॥ भ
गवानपि गोविंदः उपयेमे कुरूद्वह ॥ वैदर्भीं भीष्मकसुतां श्रियो मात्रां स्वयंवरे ॥१६॥ प्रमथ्य तरसा राज्ञः शाल्वादीं
श्चैद्यपक्षगान् ॥ पश्यतां सर्वलोकानां तार्क्ष्यपुत्रः सुधामिव ॥१७॥ ॥ ॥ ॥

यानि योजनानि तावदुत्तुंगात् मागधसंरोधदेशमतिक्रम्य परतोधो निपेततुः ॥१२॥ आकृष्णस्य विवाहान् निरूपयि
तु बलदेवविवाहं नवमस्कंधे उक्तं स्मारयति आनर्तेति ॥१५॥ मात्रां कलां ॥१६॥ गरुडो यथा देवान् प्रमथ्य सुधामहरत् ॥१७॥

ममत्वमेत्ममागमात्सर्वमेवयोरस्यादिसंगविछेदोजातः सोपंत्वपाम तानुग्रहकृतस्यात्मन्यशंतितमयासाधुभिर्विवेकिभिस्तपसे
वनेप्रवेष्टुमिष्ट्वः स्वयंत्यक्तमलभ्यमानैः प्रार्थितमत्ति ।।५५।। नदेवं विषयसेवामार्गं भगवत्सेवामार्गं चविविच्यवर्षान्तरणेष्ठा
६ मदुक्तं नेत्रोन्नमोहनका भयात्त ॰प्राकिंचनानिवृत्ताभिमाना ॰आर्थ्यो विवेकी ।।५६।। रजस्तमः सत्वगुणोस्तु वध्यते शांतस्याताः
तेन्वर्थ्यादिग्राव्यमरणादिधर्मादिरूपा ॥ विसृज्य परंपुरुषमीश्वरं सद्विमात्रे सामघनं कृतः निरंजनं तत्कृः निर्गुणं तदपिकृत ॰प्र

मन्येममानुग्रहईशतेकृतोरजणनुवंधापगमोपहृष्यया ।।य ॰प्रार्थ्यतेमधुग्भिरेकचर्य्ययावनंविनद्भिरस्वंडभूमिषैः
।।५५।। नकामयेन्यंतवयादसेवनादकिंचनप्रार्थ्यतमाद्वरंविभो ।। ॰प्राराध्य कस्त्वांह्यपवर्गदंहरे वृणीत ॰आर्थ्यो वर
मात्मवंधनं ।।५५।। तस्मान्निसृज्याशिषईश सर्वतोरजस्तमः सत्वगुणानुवंधना ।। निरंजनं निर्गुणमद्वयं परंत्वान्त
द्विमात्रंपुरुषंव्रजाम्यहं ।।५७।। चिरामहदेजिमात्तैस्ताप्यमानोनुतापैरविलषडभिर्वालब्धशांतिकथंचित् ।।शरण
दसमुपेतस्त्वत्पदाब्जंपरात्मन्नभयमृतमशोकंपाहिमापन्नमीश ।।५८।। ॥ ॥ ॥

घयं ॰ग्रत एवाक्षरंत्वांशरणंव्रजामीति ।।५५।। मुस्त्वनवद्भागान् कैवल्यमुकस्यैमेवेतिपुनर्द्वैरः ॰अलोभयंतंश्रीहरिसंपादोपग्र
हणेनप्रार्थयते चिरंचिरमितिवृजिनैः कर्म्मफलैरागैः पुनस्तद्दामनेभितप्यमानस्तथापि ॰अविलषडमित्रंगतेडवलषात्स्मानः
पिपासतरषाः षडमित्राः शत्रवइंद्रियलक्षणायस्यसः ॰अतएवालब्धशांतिः कथंचिद्दैववशेनलब्धशांतिरितिवारार
णंस्वज्ञानंददातीतितन्याहिचारेणदसमुपेतः ॰प्राप्ताहं ॰अशोकंसेहेतु ॰अभयंतत्राऽपिहेतुः करतंसतं ॰आपन्नमापदास्मा

यह॥ २ प्रप्रमाक्षयप्रमादायनभवंत्येवकुतइत्यतः २ प्राहनधारितिएकांतभक्तानांधाराधाभिः प्राप्ताभिरपिनभिद्यतेनसज्जतेइ
त्यर्थः॥ ५॥ व्यतिरेकमहापुजानानामिति अस्यतेविषयाभिमुखः॥ ६॥ तुभ्यंतव॥ ६॥ २ पुत्राभासेनभीषयंस्तपसिलोकसंग्रहेप्रवर्त्ते

श्रीभगवानुवाच सार्वभौममहाराजमतिस्तेविमलोर्जिता। वरैःप्रलोभितस्यापिनकामैर्विहतायतः॥ १॥ प्रलोभितोवरैर्यत्त्वम
प्रमादायविद्धतत्॥ नधीर्मय्येकभक्तानामाशीर्भिर्भिद्यतेक्वचित्॥ २॥ युंजानानामभक्तानांप्राणायामादिभिर्मनः। अक्षीणवा
८ सनंराजन्दृश्यतेपुनरुत्थितं॥ ३॥ विचरस्वमहींकामंमय्यावेशितमानसः। अस्त्वेवंनित्यदातुभ्यंभक्तिर्मय्यनपायिनी॥ ४॥ क्षात्र
धर्मस्थितोजंतून्न्यवधीर्मृगयादिभिः। समाहितस्तत्तपसाजह्यघमदुपाश्रयः॥ ५॥ जन्मन्यनंतरेराजन्सर्वभूतसुहृत्त
मः। भूत्वाद्विजवरस्त्वंवैमामुपैष्यसिकेवलं॥ ६॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेकालयवनवधमुचुकुंदस्तुतिर्ना
कपंचाशत्तमोध्यायः॥ ५१॥ श्रीशुकउवाच॥ इत्थंसोनुगृहीतोंगकृष्णेनेक्ष्वाकुनंदनः। तंपरिक्रम्यसंनम्यनिश्चक्रामगु ८
हामुखात्॥ १॥ संवीक्ष्यक्षुल्लकान्मर्त्यान्पश्वूर्वीरुद्वनस्पतीन्। मत्वाकलियुगंप्राप्तंजगामदिशमुत्तरां॥ २॥ तपःश्र
द्धायुतोधीरोनिःसंगोमुक्तसंशयः। समाधायमनःकृष्णेप्राविशद्गंधमादनं॥ ३॥ बदर्याश्रममासाद्यनरनारायणा
लयं। सर्वद्वंद्वसहःशांतस्तपसाराधयद्धरिं॥ ४॥

पतिस्नानधर्मेति॥ ६॥ इतिदशमेएकपंचाशत्तमोध्यायः॥ ५१॥ द्विपंचाशेप्रमेथावनमयादिवगतः पुरं। प्रन्च भोदसं
देशांककिंतएपाद्विजवाणिंतः॥ १॥ क्षुल्लकान्प्रल्पप्रमाणान्॥ २॥ तपसिश्रद्धायुतः॥ ३॥ तत्रैवबदर्याश्रमं॥ ४॥

॥ प्रहेः कुलकन्याभिदमति धार्घ्यं शतमाशंकीति ॰ आह काचेत्तिहेमकंदहेन्नसिंहनरश्रेष्ठकानामकंन्याकुलवती तया मह
तीपुरुगुणोदारधीरधीमती तांपतिनवृणीतमप्येव कंषदोषशंकेतिभावः कथंभूतं गुणलीलादिभिरात्मनैव तुल्यं निरुपमः
मित्यर्थः द्रविणं द्रव्यमेपत धामप्रभावः तयानेलोकस्य मनसामभिरमोभिरमणं यस्मात् ॥ किंच कालेविवाहावसरे ३९॥

८ कालांमुकंमहती कुलशीलरूपविद्यामयोद्रविणधामभिरात्मतुल्यं धीरांपतींकुलवती नवृणीतकन्याकाले
१० नृसिंहनरलोकमनोभिरामं ॥३९॥ नन्मेभवान्खलुवृतःपतिरंगजाया मात्मार्पितश्चभवतोत्रविभोविधेहि
मावीरभागमभिमर्षतुचैद्यआरात् गोमायुवन्मृगपतेर्वलिमंबुजाक्ष ॥४०॥ पूर्तेष्टदत्तनियमव्रतदेवविप्रगु
८ र्वर्चनादिभिरलंभगवान्परेशः आराधितोयदिगदाग्रजएत्यपाणिं गृह्णातुमेनदमघोषसुतादयोन्ये ॥४१॥

हेविभोततस्मात्तेमपाभवान्खलुपतिर्वृतः आत्माचभवतोर्पितः ॥ एतत्स्वमत्रागत्यमेभवतोजायांविधेहि
विधत्स्वाधर्मद्योतयत्याह मावीरभागमिति वीरस्यतवभागमिति वीरस्यतवभागंमांआरात् शीघ्रमेत्य शिशुपालश्चैद्योमा
भिमर्षतुमास्पृशतु मृगेन्द्रस्ये वलिंगोमायुःशृगालइवेति ॥४०॥ अनेकजन्मकृतैःसुकृतैरिदमेवमेस्यादिति प्रार्थयते पूर्तेति

सधर्मोस्यब्राह्मणस्याखिलकामदोग्धाधयद्वा सब्राह्मणोसविश्वस्याखिलकामधुगिति ॥ ३१ लोकानाप्नोतितिलोकांतलोकांतरंयर्थ्य
इतीति नेकत्र निष्ठत्वं स्थित्ती स्यर्थः ॥ आप्नोतीति पाठे सुरेश्वरोपि भवेत् लोकानाप्नोति उत्तमैलोकान् प्राप्नोत्य प्राप्तूस्वलिर्थानाम्
र्थः तत्त्वाहत्सर्वप्रयोगेषु वाक्पारण्यादिदृष्टिवरत्तापहितः ॥ ३३ स्वलाभः स्वेन एव प्राप्तोलाभः ॥ पुनर्लाभो भावेनेन संतुष्टान् एणी
साधून् स्वधर्मनिष्ठान् ३४ यस्यराज्ञो विशेषये देशा ॥ ३५ मतः स्थानात् यदिच्छया धस्यकार्य्यस्यच्छपादर्गाः समुद्द ॥ ३६ ते एष्टः
संप्रश्नः एष्टयोर्थीयस्य सः परिमोहेनायमेस्वरेयावेधनाम भिप्रेतके किंगत्र्येष्टित मित्यादि सर्वेर्क्रिं किएणास्वयमेकांत

कच्चित् द्विजवरश्रेष्ठ धर्मस्ते वृद्धसंमतः ॥ वर्त्तते नातिकृच्छ्रेण संतुष्टमनसः सदा ॥ ३१ ॥ संतुष्टो यर्हि वर्तेत ब्राह्मणो येन केन
चित् ॥ प्रहीयमानः स्वात् धर्मात् स ह्यस्याखिलकामधुक् ॥ ३२ ॥ असंतुष्टोसकृल्लोकानाप्नोत्यपि सुरेश्वरः ॥ अकिंचनोपि
संतुष्टः शेते सर्वांगविज्वरः ॥ ३३ ॥ विप्रान्स्वलाभसंतुष्टान् साधून्भूतसुहृत्तमान् ॥ निरहंकारिणः शांतान् नमस्ये शि
रसासकृत् ॥ ३४ ॥ कच्चिद्वः कुशलं ब्रह्मन् राजतो यस्य हि प्रजाः ॥ सुखं वसंति विषये पाल्यमानाः स मे प्रियः ॥ ३५ ॥ यतस्त्व
मागतो दुर्गं निस्तीर्येह यदिच्छया ॥ सर्वं नो ब्रूहि गुह्यं चेत् किं कार्यं करवाम ते ॥ ३६ ॥ एवं सम्पृष्टसंप्रश्नो ब्राह्मणः परमे
ष्ठिना ॥ लीलागृहीतदेहेन तस्मै सर्वमवर्णयत् ॥ ३७ ॥ श्रीरुक्मिण्युवाच ॥ श्रुत्वा गुणान् भुवनसुंदर शृण्वतां ते निर्वि
श्य कर्णविवरैर्हरतोंगतापं ॥ रूपं दृशां दृशिमतामखिलार्थलाभं त्वय्यच्युताविशति चित्तमपत्रपं मे ॥ ३८ ॥

लीलिस्त्वादन्नपत्निरिकामुग्रामनुत्व्यह सूथय प्रेमचिन्हादर्शयन् ॥ ३७ ॥ ब्राह्मणः श्रीहीमानुत्तयावाचयति श्रुत्वेति ॥ यथमर्थः हे
भुवनसुंदर इति ॥ श्रोत्रसर्कं द्योतयति कनमहिमाकर्चाहरूपकुलशीलादियुक्तान् पितयाप्ययगतान्नपायस्मात्
तन्मयित्तं तपि प्राविशति प्रासजेत तत्कृतः इत्यत्र आह श्रे एवतां कर्णविवरैरतः प्रविश्य अंगतापं प्रोति संबोधनं वा

त्रिपंचाशत्तमे गत्वा विदर्भान् हरिहृतः रुक्मिणीं मद्धन्त्र [?] मोभिषितां द्विषतां बलात् ॥१॥ विज्ञाय प्रलम्भकारणं
तं रेवेदेतिस [?] याः प्रकाशितमप्य हं जानामीति ॥२॥ प्रानयिष्ये प्रानेष्यामि राजन्याः यसदान् राजसु हीनान् उन्मथ्यानयनेन
इति ॥ ३ ॥ धस कृतिंतु द्वाहद्वी मिति परश्वो रात्रौ विवाह इति नक्षत्रमिति विज्ञाय ॥४॥ तस्यां रात्र्यां प्रस्थाप प्रातर्विदर्भदेशानगमदश्वो
भावेति उद्वहने विदर्भान् गत्प्रः समेत्य इति रुक्मिणीसंदेशान् मेवइत्यादीनि चत्वारि ग्रन्थनामानि ॥६॥ पुत्रस्य रुक्मिणः
स्नेहेन तद्वशमनुगच्छता तेन तथा अनेन शिशुपालेन अभिरुचिं च यो नपति कर्माणि पुरालंकारपितृदेवार्चनानि ॥ तान्येवाहसु ११

श्रीशुक उवाच वैदर्भ्याः स तु संदेशं निशम्य यदुनंदनः । प्रगृह्य पाणिना पाणिं प्रहसन् द्विजमब्रवीत् ॥१॥ श्रीभगवानुवाच
यथा विनिद्राम छिन्ना वैदर्भी कमलेक्षणा । तथाहमपि तच्चित्तो निद्रां च न लभे निशि । वेदाहं रुक्मिणा द्वेषान् ममोद्वा
हो निवारितः ॥२॥ तामानयिष्य उन्मथ्य राजन्यापसदान् मृधे । मत्परामनवद्यांगीमेधसोग्निशिखामिव ॥३॥
10 उद्वाहर्क्षं च विज्ञाय रुक्मिण्या मधुसूदनः । रथः संयुज्यतामाशु दारुकेत्याह सारथिं ॥४॥ स चाश्वैः शैव्यसुग्रीवमेघ
पुष्पवलाहकैः । युक्तं रथमुपानीय तस्थौ प्रांजलिरग्रतः ॥५॥ आरुह्य स्यंदनं शौरिर्द्विजमारोप्य तूर्णगैः । आनर्तादेकरा
त्रेण विदर्भानगमद्धयैः ॥६॥ राजा स कुंडिनपतिः पुत्रस्नेहवशं गतः । शिशुपालाय स्वां कन्यां दास्यन् कर्माण्यकारयत् ॥७॥
पुरं सम्मृष्टसंसिक्तमार्गरथ्याचतुष्पथं । चित्रध्वजपताकाभिस्तोरणैः समलंकृतं ॥८॥ स्रग्गंधमाल्याभरणैर्विर
जोम्बरभूषितैः । जुष्टं स्त्रीपुरुषैः श्रीमद्गृहैरगुरुधूपितैः ॥९॥ पितॄन् देवान् समभ्यर्च्य विप्रांश्च विधिवन्नृप । भोजयित्वा

रम्यत्वादि चतुर्भिः संमृष्टाः संसिक्ता मार्गादयो यस्मिन् तत् चित्रध्वजेषु पताकास्ताभिः समलंकृतमकारयत् स्रग्गंधमाल्या
भरणैः रित्यत्र मध्यपदलोपः तान्येवाह स्रग्गंधमाल्यानि ग्रथिताविद्धानि तद्वति ॥ तथाभरणैश्च अंबरैश्च भूषितैः स्त्रीपुरुषैः जुष्टं जयात् श्रीमत्

चैद्यादयः एवं बुद्धिभिरर्थिता यां त्वयि किमधुना करणीयमित्यपेक्षायामाह श्वो भाविनीति । हे अजित श्वो भाविनि उद्वहने विवाहे प्रथमं
गुप्तः अलक्षित एवागत्य पश्चात् पृतनापतिभिः परीतः सन् चैद्यादिबलं निर्मथ्य प्रसह्य हठात् वीर्यप्रभावदर्शनमेव शुल्कं वैवाहि
कं देयं यस्याः सा । अनेन राक्षसविधिनोद्वहेति उपदेशरहस्यं ॥४१॥ ननु भवतु शिशुपालादिबलप्रमथनं अंतःपुरमध्यगतायास्तु
वहरणे त्वद्बंधुवधोपि प्रसज्जेतेत्यत आह । अंतःपुरेति पूर्वेद्युर्विवाहात्पूर्वमाने गिरिजामेव कायाः । अंबिकागृहादेव मम हरणं तु करामि
भावः ॥४२॥ ननु किमनेनानर्थकारिणा निर्बंधेन चैद्योपि तावत्सुख्यातगुणकर्मा योग्य एव वर इति तत्राह यस्येति हे अंबुजाक्ष

श्वो भाविनि त्वमजितोद्वहने विदर्भान् गुप्तः समेत्य पृतनापतिभिः परीतः ॥ निर्मथ्य चैद्यमगधेंद्रबलं प्रसह्य मां राक्षसेन वि
धिनोद्वह वीर्यशुल्कां ॥४१॥ अंतःपुरांतरचरीमनिहत्य बंधून् त्वामुद्वहे कथमिति प्रवदाम्युपायं पूर्वेद्युरस्ति महती कुलदे
वयात्रा यस्यां बहिर्नववधूर्गिरिजामुपेयात् ॥४२॥ यस्यांघ्रिपंकजरजःस्नपनं महांतो वांछंत्युमापतिरिवात्मतमो
पहत्यै ॥ यर्ह्यंबुजाक्ष न लभेय भवत्प्रसादं जह्यामसून् व्रतकृशान् शतजन्मभिः स्यात् ॥४३॥ ब्राह्मण उवाच ॥ इत्येते गु
ह्यसंदेशा यदुदेव मयाहृताः । विमृश्य कर्तुं यच्चात्र क्रियतां तदनंतरं ॥४४॥ इति श्रीभागवते महापुराणे दशमस्कंधे रुक्मिण्यु
द्वाहे द्विपंचाशत्तमो ध्यायः ॥५२॥

यस्य भवतोंघ्रिपंकजरजोभिः स्नपनं आत्मनः तमसोपहत्यै उमापतिरिव महांतो वांछंति ॥ तस्य भवतः प्रसादं यर्ह्यहं न लभे
येन प्राप्नुयां तर्हि व्रतोपवासादिभिः कृशान् असून् प्राणान् जह्यां त्यजेयं ततः किमित्यत आह ॥ शतजन्मभिरिति एवमेव
वारं वारं जह्यां यावच्छतजन्मभिरपि त्वत्प्रसादः स्यादिति ॥४३॥ अत्र यत्कर्तुं करणीयं तच्चानंतरमेव क्रियतामिति ॥४४॥
दशमे द्विपंचाशत्तमो ध्यायः ॥५२॥

त्रियामा रात्रिस्तावन्मात्रेणोन्नतेति: अल्पराधसः मंदभाग्यायां ॥२४॥ जुगुप्सितं धार्ष्ट्यादि प्रयातीति शंकायां हन्तोऽयमः इति प्रस्तावार्थः
अद्य हृताद्य मया जनप्रस्थापितवान् प्रस्थानावसरे च किंचिन्मपि जुगुप्सितं मया प्रत्याचष्ट अत: सोपि द्विजो नूनं नायातीति
पश्चान्मनोनिर्गते पिस्त्री कृष्णमेदेव वै मुख्यान् कृचिन्त्यति वैधो भवादितो हर्षगाथायां इति ॥२५॥ कालसाधुनापि गोविंदागमनकाल
इति मत्वा किंचिदास्यलं चिन्तासत्ता चिंतास्तब्धलोचनानि मीलितवतीत्यर्थः ॥२६॥ प्रियभाषिणं प्रियमत्त चिला: पुरोपवनं प्राप्तवत्याः

१२ अहो त्रियामा ललित: उद्वाहोमेऽल्पराधसः ॥ नागच्छत्यरविंदाक्षो नाहं वेद्म्यत्र कारणं ॥२३॥ सोपि नावर्ततेऽद्यापि मत्संदेशहरो द्वि
जः ॥ प्रापमप्यनवद्यात्मा दृष्ट्वा किंचिज्जुगुप्सितं ॥२४॥ मत्पाणिग्रहणे नूनं नायाति हि कृतोद्यमः ॥ दुर्भगायाश्च मे धाता नानुकू
लो महेश्वर: ॥२५॥ देवी वा विमुखा गौरी रुद्राणी गिरिजा सती ॥ एवं चिंतयती बाला गोविंदहृतमानसा ॥२६॥ न्यमीलयत
काले नेत्रे चाश्रुकलाकुले ॥ एवं वध्वाः प्रतीक्षंत्या गोविंदागमनं नृप ॥२७॥ वामऊरुर्भुजो नेत्रमस्फुरत् प्रियभाषिण: ॥
अथ कृष्णविनिर्दिष्ट: स एव द्विजसत्तमः ॥२८॥ अंत:पुरचरीं देवीं राजपुत्रीं ददर्श ह ॥ सा तं प्रहृष्टवदनमव्यग्रात्मगतिं
सती ॥ आलक्ष्य लक्षणाभिज्ञा समपृच्छत् शुचिस्मिता ॥२९॥ तस्यावेदयत् प्राप्तं शशंस यदुनंदनं ॥ उक्तं च सत्यवचनमात्मो

कृष्णेन दिनिर्दिष्टः प्राप्नुमां कथय इत्यादिष्टः ॥२८॥ नव्यया: आत्मनो देहस्य गानि पिष्यते भूतस्य लक्षणं तत्कार्यमर्चिकमभि
जानातीति तथा ॥२९॥ तस्यै ब्राह्मं पद्मनेदने आवेदितवान् तद्वृत्तसंदेश: आत्मोपवनपवने प्राप्त प्राप्त नास्त्ये पेनश्चा कृष्णस्यानयनं
प्रतीतेन द्विजेन सत्यवचनं प्राप्तमिति आत्मन: प्राणेश्वरस्येति वा पक्षा: आत्मन: तस्या उपनयनं प्राप्ति कृष्णेन यदुक्तं सत्यवचनं तामा १२

कृतकौतुकेनविवाहोत्सवेनमंगलंयस्यास्तां ॰प्रहृतंनवीनंभूषणोत्तमैश्चभूषितां ॥ १२ ॥ वध्वालसंतीःकन्यायाः॰प्रपद्यवित॰प्रपदे
णामंत्रवित ॥ १३ ॥ प्रभुश्चैद्यो॰वीतंतत्राश्चतुरंगसैन्यैःपरिवृतःकौंडिनंभीष्मकस्यपुरंययौमदच्युद्भिर्गजैःरथैःस्यंदनैर्हेमरोचितामा
मुक्तामालांसुदतींकन्यांकृतकौतुकमंगलां ॥ प्रहृतांशुकयुग्मेनभूषितांभूषणोत्तमैः ॥ ११ ॥ चक्रुःसामर्ग्यजुर्मंत्रैर्वध्वारक्षांद्विजोत्तमाः ॥ पु
रोहितोथर्वविद्वैश्चजुहावग्रहशांतये ॥ १२ ॥ हिरण्यरूप्यवासांसितिलांश्चगुडमिश्रितान् ॥ प्रादाद्धेनूश्चविप्रेभ्योराजाविधिविदां
वरः ॥ १३ ॥ एवंचेदिपतीराजादमघोषःसुतायवै ॥ कारयामासमंत्रज्ञैःसर्वमभ्युदयोचितं ॥ १४ ॥ मदच्युद्भिर्गजानीकैःस्यंदनैर्हे
ममालिभिः ॥ पत्त्यश्वसंकुलैःसैन्यैःपरीतःकुंडिनंययौ ॥ १५ ॥ तंवैविदर्भाधिपतिःसमभ्येत्याभिपूज्यच ॥ निवेशयामासतदा
कल्पितान्यनिवेशने ॥ १६ ॥ तत्रशाल्वोजरासंधोदंतवक्त्रोविदूरथः ॥ आजग्मुश्चैद्यपक्षीयाःपौंड्रकाद्याःसहस्रशः ॥ १७ ॥
कृष्णरामद्विषोयत्ताःकन्यांचैद्यायसाधितुं ॥ यद्यागत्यहरेत्कृष्णोरामाद्यैर्यदुभिर्वृतः ॥ १८ ॥ योत्स्यामःसंहतास्तेनइतिनि
श्चितमानसाः ॥ आजग्मुर्भूभुजःसर्वेसमग्रबलवाहनाः ॥ १९ ॥ श्रुत्वैतद्भगवान्रामोविपक्षीयनृपोद्यमं ॥ कृष्णंचैकंग
तंहर्तुंकन्यांकलहशंकितः ॥ २० ॥ बलेनमहतासार्द्धंभ्रातृस्नेहपरिप्लुतः ॥ त्वरितःकुंडिनंप्रागाद्गजाश्वरथपत्तिभिः ॥ २१ ॥
भीष्मकन्यावरारोहाकांक्षंत्यागमनंहरेः ॥ प्रत्यापत्तिमपश्यंतीद्विजस्याचिंतयत्तदा ॥ २२ ॥ ॥ ॥

लाविहितेपेषुते ॥ १५ ॥ कल्पितंनिर्मितंपदन्यंनिवेशनंतस्मिन्परिपदे ॥ मोहरेन्यदिनिशंकिताः कन्यांसाधुंप्रतिमित्यर्थः ॥ १८ ॥
वोत्सुक्येनशंकाएवचिंतयदित्याह ॥ भीष्मकन्येतिप्रत्यापत्तिंप्रत्यागमनं ॥ २२ ॥ ॥

नस्या॰ध्याग्रामनं विशदं तु ष्टिरूपेच पद्मामिति ॥ अपि च मदंशो स्यादि जाधिपे॰ प्राहता वादिता इत्यर्थः वारमुख्या॰ । कोत्त
नाथ उपस्थरूपः प्राचम्य पूर्व स्नापसा वद्धा॰ भवान्विता मितितिव स्थोपसर्ज्ज नचरस्त्री कर्मी चेतमुत्तं ॥ नमस्य इति क्लिएपा
माजुपस्मरूप॰ प्राचम्य पूर्व स्नापसा वद्धाः भवान्विता मिति तिव स्वोपसर्ज्ज न च स्त्री कर्मी च तमुत्तं
नदेव दृष्टो येमंत्रः स्वसंतान पुत्रा॰ गणेशादिसहितां ॥ प्रात्मारामो सोकथं चत्यति भवेदिति चेदत॰ प्राह॰ तदनुमोदतां ॥

पद्मां विनिध्यायेद् हृदंभवान्याः पादपल्लवं साचानुध्यायती सम्यक् मुकुंदचरणांबुजं ॥ ४० ॥ मत्तवाङ्नतभिः सार्द्ध सखीभिः
१२ परिवारिता गुप्तारोज भौ॰ स्त्रैः सन्नद्ध दधतायुधैः ॥ ४१ ॥ मदंशभैरवपणवामूर्य भेयीश्रजधीरे ॥ नानापहारवलिभि
वीरमुख्याः सहस्रशः ॥ ४२ ॥ स्त्रगंधवस्त्राभरणैर्द्विजपत्न्यः स्वलंकृता ॥ गायंतस्तद् स्तुवंतस्त्र गायका वाद्यवादका
॥ ४३ ॥ परिवार्य्य वधूजग्मुः सूतमागधवंदिनः ॥ प्राप्ता द्यदेवसदने धौतपादकराबुजा ॥ ४४ ॥ उपस्पृश्य शुचिः शांता प्र
विवेशांविकांतिकं नांवैपूर्वपसोवालां विधिज्ञा विप्रयोषितः ॥ ४५ ॥ भवानि वंदयो चक्रे भवपत्नीं भवान्वितां नमस्ये १२
12 त्वां विके भीच्छांस्वसंतान युतां शिवां भूयात्पतिर्मे भगवान् कृष्णस्तदनुमोदतां ॥ ४६ ॥ अद्भिर्गंधाक्षतैर्धूपैः वासःस्र
ङ्माल्यभूषणैः नानोपहारवलिभिः प्रदीपावलिभिः पृथक् ॥ ४७ ॥ विप्रस्त्रियः पतिमतीस्तथा तैः समपूजयत् लव
णापूपतांबूलकंठसूत्रफलेक्षुभिः ॥ ४८ ॥ तस्यै स्त्रियस्ताः प्रददुः शेषां युयुजुराशिषः ताभ्यो देवी नमश्चक्रे शेषां च जगृ
हे वधूः ॥ ४९ ॥ मुनिव्रतमथ त्यक्त्वा निश्चक्रामांविकागृहात् प्रगृह्य पाणिना भृत्यां रत्नमुद्रोपशोभिना ॥ ५० ॥

मिति भागवतो क्तिः मुद्दस्य एव वधूवासः स्रग्गंधादिभिः पूर्वकांसमपूजयत् तथा विप्रस्त्रियोपि तैर्द्रव्यैर्लवणादिभिश्च समपूजयानि
तिशेषां निर्माल्यां मुनिव्रतं मौनं भृत्यां सखीं ॥ ५० ॥

यदाकेवलं न नाम पश्यामि इत्यादि विनयार्थः यद्यामांश्चिंयंपे
तेकृष्णं १ प्राप्तोऽस्मि कार्यं सर्वं स्वार्प्यएणमप्यपर्याप्तमिति तदुचितं प्रियमपश्यंती नरा केवलं न नाम पश्यामि ॥ २१ महामतिरित्यनेन
नमेमिलाद्वस्सर्वमिपदामस्यदंभवंति किंपुनर्मे पिप्रणतायामिति ततोऽधिकमन्यत् प्रियं न पश्यंती नमो मेति ॥ २१ समेतानां राज्ञाम
श्राश्रमोवाह कन्यामुद्योद्गुमेवागतः स्यादितिवरो चिंतनविधिनासमपुज्ययेदिति त्वचितं पश्यपयावत् ॥ २२ ॥ समेतानां राज्ञामाश्रमं
धेवाचाधेनतिज्ञप्यतंतमीहितवानित्यर्थः ॥ २५ ॥ श्राश्रमभाविकमिन्त्वचकं जनानुरागं दर्शयति श्राश्रममागतमिति

नमाशनंसमासायवेदर्भीहृष्टमानसा ॥ नयपंपंतं ब्राह्मणाय प्रियमन्यन्नमामसा ॥ २३ ॥ प्राप्तोऽस्मुचासवहुहितुरुग्राहप्रेमणो
स्पृकोः ॥ प्रश्नयाल्प्यघाघेणरामद्भुमो समहिणोः ॥ २८ मधुपर्कं मुपानाथवासांसि विरजानि च उपायनान्यभीष्टानि
विधिवत्समपूजयत् ॥ २७ ॥ तयोर्निवेशनं श्रामेदुपकल्प महामतिः ॥ सपैन्ययोः प्राज्ञयोरा तिष्ठं विदधे यथा ॥ २७
एवं स्त्रां समेतानां पयावो द्वौ पयावधः पयावलं यथा विन्नं सर्वैः कामैः समर्हयत् ॥ २५ ॥ श्रममागतमाक एषविद
र्भपुरवासिनः ॥ प्रागात्पनेत्राजलिभिः पपुस्तन्मुखपंकजं ॥ २६ ॥ प्रश्मेवभापीभाविनं के किं एवं हितिनापरा ॥ प्रसाव
प्यनवद्यात्माभैष्म्याः समुचितः पतिः ॥ ३० ॥ किंचित्सुचरितं यन्नस्तेन तुष्टा त्रिलोककृत् ॥ प्रनुगृह्णातुदेवोसौवैदर्भीः
पाणिमच्युतः ॥ ३१ ॥ एवं प्रेमकलावद्भावदानि स्मपुरोकसः ॥ कन्या चांतःपुरात्प्राणाङ्गृह्यैगुह्मा विकालयं ॥ ३२ ॥ श्रारामहस्म ॥

मिः ॥ ३३ ॥ प्रस्पेवरुक्मि एषवश्चहस्त्येवश्चतवेवभैष्म्या एव समुचितः एवेति षडवधारणानि तच्चैकस्मिन्व्यतिरेक प्रदर्शन
मुपलक्षणार्थं नाथ इति नचवाक्यभेददोषः प्रनुद्यविधेयभेदेन भिन्नानामेव वाक्यानां सहप्रयोगात् ॥ हंसमाहि
इत्यादिवादेति ॥ प्रथमेवानुगृह्णाति मेदिवानिति ॥ प्रनुगृह्णात्विति ॥ २ ॥

द०उ०

चतुःपंचाशत्तमेतु जरासंधादिपक्षगाः ॥ तक्मिणं चावैध्यायभैष्याः पाणिं पुरेगृहीत ॥ अहो धिगस्मानित्येवं वदंतस्तुसंरब्धाः
कोपाविष्टाः दंशिताः कृतसंनाहाः परिवृताः ॥ अन्वीयुः अन्वधावन् १ विस्फूर्ज्य टंकारयित्वा पतेयाणांधाराणां वाहुल्येयाद

श्रीशुक उवाच ॥ इति सर्वे सुसंरब्धा वाहानारुह्य दंशिताः ॥ स्वैः स्वैर्बलैः परिक्रांता अन्वीयुर्धृतकार्मुकाः ॥ १ ॥ तानापतत आ
लोक्य यादवानीकयूथपाः ॥ तस्थुस्तत्संमुखा राजन् विस्फूर्ज्य स्वधनूंषि ते ॥ २ ॥ अश्वपृष्ठे गजस्कंधे रथोपस्थे च कोविदाः ॥
२४ मुमुचुः शरवर्षाणि मेघा अद्रिष्वपो यथा ॥ ३ ॥ पत्युर्बलं शरासारैः छन्नं वीक्ष्य सुमध्यमा ॥ सव्रीडमैक्षत्तद्वक्त्रं भयविह्वल
लोचना ॥ ४ ॥ प्रहस्य भगवानाह मास्म भैर्वामलोचने ॥ विनंक्ष्यत्यधुनैवैतत्तावकैः शात्रवं बलं ॥ ५ ॥ तेषां तद्विक्रमं वीरा गद
संकर्षणादयः ॥ अमृष्यमाणा नाराचैर्जघ्नुर्हयगजान् रथान् ॥ ६ ॥ पेतुः शिरांसि रथिनामश्विनां गजिनां भुवि ॥ सकुंडल
कीरीटानि सोष्णीषाणि च कोटिशः ॥ ७ ॥ हस्ताः सासिगदेष्वासाः करभा ऊरवोंघ्रयः ॥ अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरांसि
13 च ॥ ८ ॥ हन्यमानबलानीका वृष्णिभिर्जयकांक्षिभिः ॥ राजानो विमुखा जग्मुर्जरासंधपुरःसराः ॥ ९ ॥ शिशुपालं समभ्येत्य
हृतदारमिवातुरं ॥ नष्टत्विषं गतोत्साहं शुष्यद्वदनमब्रुवन् ॥ १० ॥ भो भोः पुरुषशार्दूल दौर्मनस्यमिदं त्यज ॥ न प्रियाप्रिययो

राजन् उच्यते

वानामचलले दृष्टांतः मेघा इति ५ हे वामलोचने मास्म भैः मा भयं कुरु हे वामलोचने एवं राज्ञिता वके स्वदीयैः ह्लसा ॥ सचासौ विक्रमश्च
तेऽषाषाणि शिरोवर्तसवस्त्राणि तत्सहितानि शिरांसि ७ करभाः प्रकोष्ठाद्ग्रतः विशेषणं वा ८ अश्वाश्वतरमेवात्खलक्षरविंदौ ॥ १०
उ२

तां विलोक्यवीरामुमुहुरितितती वश्लोकनान्वयः श्यामामजातरजस्कां कुंभलेभ्यः शंकितेश्वचपलेई क्षणेयस्या स्तांद्विजादंताएवकु
दानांकुञ्जलानिमुकुलानिविंवफलवत् यो धरस्तस्य द्युतिभिः शोणमानानियस्यांकलाशोभातस्य तां नूपरसिंजद्वागकालानूपरयुत
तस्यधामदीप्तिः तेनशोभितांशीलमस्यास्तेनपदाचलेतांनकेवलंमुमुहुः पेतुश्चेत्याह यामितियां त्रिमिषेणहरयेस्वलावण्यंसमर्पयं

तांदेवमायामिववीरमोहिनींसुमध्यमांकुंडलमंडिताननां॥ श्यामांनितंवार्पितरत्नमेखलांव्यंजत्स्तनींकुंतलशंकितेक्षणां॥५॥
शुचिस्मितांविंवफलाधरद्युतिः शोणायमानद्विजकुंदकुड्मलां॥ पदाचलंतींकलहंसगामिनींसिंजत्कलानूपरधामशोभिना
॥५२॥ विलोक्यवीरामुमुहुः समागतायशस्विनस्तत्कृतहृच्छयार्दिताः॥ यांवीक्ष्यतेनृपतयस्तदुदारहासव्रीडावलोकहृतचेतस उज्झितास्त्राः॥
स्खलयंतीचरणाम्बुजके॥ सोप्राप्नुयात्तत्रभगवतःप्रसभीक्ष्यमाणा॥५४॥ उत्सार्यवामकरजैरलकानपांगैःप्राप्तान्ह्रियैक्षतनृ
न्पान्ददृशेच्युतंसा॥ तांराजकन्यांरथमारुरुक्षतींजहारकृष्णोद्विषतांसमीक्षतां॥५५॥ रथंसमारोप्यसुपर्णलक्षणंरा
जन्यचक्रंपरिभूयमाधवः॥ ततोययौरामपुरोगमःशनैःशृगालमध्यादिवभागहृद्धरिः॥५६॥ तंमानिनःस्वाभिभवंयशः
क्षयंपरेजरासंधवशानसेहिरे॥ अहोधिगस्मान्यशःआत्तधन्विनांगोपैर्हृतंकेसरिणांमृगैरिव॥५७॥ इतिश्रीभा
गवतेमहापुराणेदशमस्कंधेरुक्मिणीहरणेपंचशत्तमोध्यायः॥५३॥

तीयांवीक्ष्यक्षितिसौपेतुः सातान्प्राप्तान्ह्रियैक्षतनृ तंदेवाच्युतंददर्शेत्युत्तरेणान्वयः॥ पद्मकोशतुल्यौचरणौचालयंतीसुपर्णा
लक्षणंगरुडध्वजंहरेःसेहः॥ अहमानानांतेषांआक्रोशमाह॥ अहोधिगस्मान्यतोस्माकंयशोयंगोपैर्हृतमिति॥ दशमे

...॥५३॥ ...यास्त्वगतांविमृताः २

यदूनां कुलपांसन कुलदूषणा । वस्तुतस्तु यदूनां कुलस्य पांसनहे । अंसनं स्वयं चारिपुहननचतुर । अंसमाघात इत्यस्माज्जातो ऽकर्त्तरि लुट्
प्रत्ययोनघादि विहितः ॥२३॥ ध्वांक्षः काकः स यथा हविर्मुष्णाति तद्वत् वस्तुतस्तु अध्वांक्षवदिति छेदः सहत्वाक्षवदित्यर्थः २४

धनुर्विकृष्य सुदृढं जघ्ने कृष्णं त्रिभिः शरैः । आह चात्र क्षणं तिष्ठ यदूनां कुलपांसन ॥२४॥ यत्र यासि स्वसारं मे मुषित्वा ध्वांक्षवद्धविः
हरिष्येऽद्य मदं मन्द मायिनः कूटयोधिन ॥२५॥ यावन्न मे हतो बाणैः शयीथा मुंच दारिकां । स्मयन्कृष्णो धनुश्छित्वा षड्भिर्वि
व्याध रुक्मिणं ॥२६॥ अष्टभिश्चतुरो वाहान्द्वाभ्यां सूतं ध्वजं त्रिभिः । स चान्यद्धनुराधाय कृष्णं विव्याध पंचभिः ॥२७॥ तैः
२५ ताडितः शरौघैस्तु चिच्छेद धनुरच्युतः । पुनरन्यदुपादत्त तदप्यच्छिनदव्ययः ॥२८॥ परिघं पट्टिशं शूलं चर्मासी शक्तितो
मरौ । यद्यदायुधमादत्त तत्सर्वं सोऽच्छिनद्धरिः ॥२९॥ ततो रथादवप्लुत्य खड्गपाणिर्जिघांसया । कृष्णमभ्यद्रवत्क्रुद्धः
पतंग इव पावकं ॥३०॥ तस्य चापततः खड्गं तिलशश्चर्म चेषुभिः । छित्वासिमाददे तिग्मं रुक्मिणं हन्तुमुद्यतः ॥३१॥ १५
14 दृष्ट्वा भ्रातृवधोद्योगं रुक्मिणी भयविह्वला । पतित्वा पादयोर्भर्त्तुरुवाच करुणं सती ॥३२॥ योगेश्वराप्रमेयात्मन्
देवदेव जगत्पते । हन्तुं नार्हसि कल्याण भ्रातरं मे महाभुज ॥३३॥ श्रीशुक उवाच ॥ तया परित्रासविकंपितांगया शु
चावशुष्यन्मुखरुद्धकंठया । कातर्यविस्रंसितहेममालया गृहीतपादः करुणो न्यवर्तत ॥३४॥

हमास्येत्यर्थः ॥२५॥ परित्रासेन कंपितान्यंगानि यस्याः शुचा शोकेन शुष्यन्मुखं यस्याः रुद्धः कंठो यस्याः साच साच
तया कातर्येण विस्रंसिता हेममयी माला यस्याः तया गृहीतौ पादौ यस्य सः ३४॥

कुहकोमत्तीपितातस्येछया दुखेपीहमानचेनंपारवश्यंपवात्तं दर्शितं ॥१२॥ प्रत्रचाहमेवदृष्टांत इत्याह जरासंधः शौरेरितिकृष्णा
त्सकाशात् एवंसप्तयुगपर्यंतेकेवलं श्रुतिमिवेजिष्णोजितवानहं ॥१३॥ देवमहंत्वद्युनेनैव ॥ [illegible] ॥ [illegible] सैन्यैः ॥१५॥ प्रदक्षिणः
पथ्यादारुमयीयोषिन्नृत्यतेकुहकेछया ॥ एवमीश्वरतंत्रोयमीहतेसुखदुःखयोः ॥१२॥ शौरेःसप्तदशाहंवैसंयुगानिपराजितः
त्रयोविंशद्भिःसैन्यैर्जिग्यएकमहंपरं ॥१३॥ तथाप्यहंनशोच्यामिनप्रहृष्यामिकर्हिचित् ॥ कालेनदैवयुक्तेनजानन्विद्रा
वितंजगत् ॥१४॥ अधुनापिवयंसर्वेवीरयूथपयूथपाः ॥ पराजिताःफाल्गुतंत्रैर्यदुभिःकृष्णपालितैः ॥१५॥ रिपवोजिग्यु
रधुनाकाले आत्मानुसारिणि ॥ तदावयंविजेष्यामोयदाकालःप्रदक्षिणः ॥१६॥ एवंप्रबोधितोमित्रैश्चैद्योगात्सानु
गःपुरं ॥ हतशेषाःपुनस्तेपिययुःस्वंस्वंपुरंनृपाः ॥१७॥ रुक्मीतुराक्षसोद्वाहंकृष्णद्विडसहन्स्वसुः ॥ पृष्ठतोन्वगमत्कृष्ण
मक्षौहिण्यावृतोवली ॥१८॥ रुक्म्यमर्षीसुसंरब्धःशृण्वतांसर्वभूभुजां ॥ प्रतिजज्ञेमहाबाहुःदंशितःसशरासनः ॥१९॥
ऽहत्वासमरेकृष्णमप्रत्यूह्यचरुक्मिणीं ॥ कुंडिनंनप्रवेक्ष्यामिसत्यमेतत्ब्रवीमिवः ॥२०॥ इत्युक्त्वारथमारुह्यसारथींप्रा
हसत्वरः ॥ चोदयाश्वान्यतःकृष्णःतस्यमेसंयुगंभवेत् ॥२१॥ अद्याहंनिशितैर्बाणैर्गोपालस्यसुदुर्मतेः ॥ नेष्येवीर्यम
देयेनस्वसामेप्रसभंहृता ॥२२॥ विकत्थमानःकुमतिरीश्वरस्याप्रमाणवित् ॥ रथेनैकेनगोविंदंतिष्ठतिष्ठेत्यथाह्वयत् ॥२३॥

ऽप्रतिकूलःस्यात् ॥१९॥ गोपालस्येवेदपालकस्येतिवाक्यशेषः ॥ तथासुदुर्मतेरितिशोभना ऽनुग्रहवता दुःखेप्रियमतिर्यस्य
तस्येति ॥२१॥ रामराम

८०

कुत इत्यत आह आत्ममोह इति ॥४३॥ परमार्थमाह एक एवेति परः शुद्धः ज्योतिश्चंद्रादि यथोदकेषु नभो यथा घटादिष्विति ॥४४॥
कुतः तर्हि न च ममृत्यादिवदात्मानि एकः शुद्धो मनीश्वस्तत्राह देह इति जन्मादिमत् प्राणा इन्द्रियाणि गुणाः शब्दादयः तदात्मकः देव
तत्वेन यात्मनि कल्पितदेहोपाधिना शुद्धो न प्रतीयत इत्यर्थः ननु देहसंबंधमात्रेऽपि संसारे सति शुद्धत्वं गतमेव तत्राह नात्मन इति असत
ति अन्येनाधिभौतादिना आत्मनः संयोगवियोगौ न स्तः कुतः असतः असत्वादन्यस्येत्यर्थः कुतोऽसत्वेन तत्राह तद्धेतुत्वा

१६ आत्ममोहो नृणामेव कल्पते देवमायया । सुहृद्दुर्हृदुदासीन इति देहात्ममानिनाम् ॥४३॥
एक एव परो ह्यात्मा सर्वेषामपि देहिनाम् । नानेव गृह्यते मूढैः यथा ज्योतिर्यथा नभः ॥४४॥
देह आद्यन्तवानेष द्रव्यप्राणगुणात्मकः । आत्मन्यविद्यया कॢप्तः संसारयति देहिनम् ॥४५॥
15 नात्मनोऽन्येन संयोगो वियोगश्चासतः सति । तद्धेतुत्वात्तत्प्रसिद्धेः दृग्रूपाभ्यां यथा रवेः ॥४६॥ १६

दितितस्यान्यस्य भूतेन्द्रियादेः प्रसिद्धेः प्रकाशस्य न हेतुत्वात् आत्महेतुकत्वात् ननु देवैरधिष्ठितैर्भूतेन्द्रियैः भूतानां प्रती
तिः प्रसिद्धा भूतप्रतीत्या च तत्प्रसिद्धिः नात्मन इत्यत आह दृग्रूपाभ्यां यथा रवेः यथा प्रकाशप्रकाश्यकत्वेन वर्त्तमान
योरपि चक्षुरूपयोः रवेः सकाशात् प्रसिद्धिः द्वयोरपि तेजसत्वात्तदभेदश्च तथा भूतेन्द्रियादीनां परस्परोऽपि चैतन्याधान
प्रकाशः तत्कार्यत्वाद्ध्वस्तव्यतिरेकेण सच भिन्नस्यार्थः तथा च श्रावदर्शो वदत्यपि दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथग्भवेत् ए
वं धीः खानि मात्राश्च न स्युरन्यतमादृतादिति यद्वा रवेः प्रसिद्धाभ्यामेव दृग्रूपाभ्यां परस्परप्रसिद्धिर्यथा तद्वदिति ॥४६॥

सश्मश्रुकेशांसहितानिस्थानेवाशिष्टानिश्मश्रूणांकेशाश्चयथाभवंतितथातेनेचासिनाप्रवपन्मुंडयन्वैरूप्यमकोः
रोत् ॥ नयाभर्तः ॥ हतेप्रायमित्यत्तरवाक्येप्यनुषंगः ॥ ३५ ॥ रुक्मिणीसांत्वयति मेवास्मानिति ॥ पुनः कृष्णमाज्ञातिपतिवधरिति
पुनर्देवीप्रत्याह सत्रियाणामिति ॥ येनधर्मेणभ्रातापिभ्रातरंहन्यात् ततस्मात्घोरतरः प्रतिदारुणः धर्मोऽस्माकमपर
ध ॥ इतिभाव ॥ ३६ ॥ पुनःश्रीकृष्णंप्रत्याह राजस्यतितयाप्यस्माकमेतदनुचितमितिभावः ॥ ४१ ॥ पुनर्देवीप्रत्याह ॥ नवेयमिति ॥ स

चैलेनवध्यात्मसाधुकारिणंसश्मश्रुकेशंप्रवपन्वैरूप्यं ॥ तावन्ममर्दः परसैन्यमद्भुतंयदुप्रवीरानलिनांयथागः
जाः ॥ ३५ ॥ कृष्णानकमुपवज्यदद्दशुभ्रातरंफाक्मिणं ॥ नयाभर्तहतप्रायंदृष्ट्वासंकर्षणोविभुः ॥ ३६ ॥ विमुच्यबद्धंकरुणो
भगवान्कृष्णमब्रवीत् ॥ असाध्विदंत्वयाकृष्णकृतमस्मज्जुगुप्सितं ॥ ३७ ॥ वपनंश्मश्रुकेशानांवैरूप्यंसुहृदोवधः
॥ मैवास्मान्साध्व्यसूयेथाभ्रातुर्वैरूप्यचिंतया ॥ ३८ ॥ सुखदुःखदोनचान्योस्तियतःस्वकृतभुक्पुमान् ॥ बंधुर्वधार्ह
दोषोपिनबंधोर्वधमर्हति ॥ ३९ ॥ त्याज्यःस्वेनैवदोषेणहतःकिंहन्यतेपुनः ॥ क्षत्रियाणामयंधर्मःप्रजापतिविनिः
र्मितः ॥ ४० ॥ भ्रातापिभ्रातरंहन्यात्येनघोरतरस्ततः ॥ राज्यस्यभूमेर्वित्तस्यस्त्रियोमानस्यतेजसः ॥ ४१ ॥ मानि
नोन्यस्यवाहेतोःश्रीमदांधाःक्षिपंतिहि ॥ नवेयंविषमाबुद्धिःसर्वभूतेषुदुर्हृदां ॥ यन्मन्यसेसदाभद्रंसुहृ न

दांभूतेषुदुर्हृदामहतानांभ्रातृणां श्रीसबद्भद्रमन्यसेइच्छसायत्तवविषमा असमीचीनाबुद्धिः कुतःयतस्त्वदेवसुहृदामभ
द्रमिति यद्वासर्वभूतेषुदुर्हृदामपिस्वसुहृदांभद्रमेवंदंडरूपमइनमभद्रंयन्मन्यसेतवेयंविषमाबुद्धिरिति अथवास
र्वभूतेषुमध्येदुर्हृदांराजपालादीनांअभद्रंसुहृदांभद्रंचयन्मन्यसेतवेयंविषमाबुद्धिःसमाननभवति ॥ अन्न वर
अन्नानामिव ॥ ४२ ॥

८०

भितैरिंद्रकेतुभिर्ध्वजाविशेषैः पल्लवाम्रानि मंगलानि लाजांकुरपुष्पप्रकारादीनि पानीति ॥ ४६ ॥ आहूताये प्रेष्ठा भूभुजस्तेषां
गजेंद्रा मदस्राविणः उच्छ्रितायै भास्वद्रुक्माभ्यां रूपयोा भिता ॥ पद्मालैरंगजैः परामृष्टाः तेस्युः इति ॥ ४७ ॥ तं
त्वमांदोत्सुक्यात्परिधावतां मध्ये मिथः समेत्य मदं प्राप्ता ॥ ४८ ॥ इति दशमे चतुःपंचाशत्तमः ॥ पंचपंचाशत्तमे तु प्रद्युम्नो
जातिर्दैत्येन शंबरेणाहृतस्तं हत्वा सायं कालेन यागमत् ॥ १ ॥ प्रद्युम्नहारिनीलाभा ॥ देवैः शंबराहरणादिना ॥ कृष्णेन विनाम्रपत्न्यादि

११ धात्वाम्रपुष्पैस्तु भिर्तेंद्रकेतुभिर्विचित्रमाल्यांवरस्त्रतोरणैः ॥ बभौ प्रतिद्वार्युपक्लृप्तमंगलैरप्यागरुभ्यगुरुधूपदीप
कैः ॥ ४६ ॥ सिक्तमार्गमदच्युद्भिराहूतप्रेष्ठभूभुजां ॥ गजैर्द्वास्सुपरामृष्टरंभापूगोपशोभिता ॥ ४७ ॥ कुरुसंज्ञयकेकयवि
दर्भयदुकुंतयः ॥ मिथो मुमुदिरे तस्मिन्संभ्रमात्परिधावतां ॥ ४८ ॥ रुक्मिण्याहरणं श्रुत्वा गीयमानं ततस्ततः ॥ राजानो
राजकन्याश्च बभूवुर्भृशविस्मिताः ॥ ४९ ॥ द्वारकायामभूज्जन्महामोदः पुरौकसां ॥ रुक्मिण्या रमयोपेतं दृष्ट्वा हृष्टं ११
श्रियः पतिं ॥ ५० ॥ इति श्रीभागवते महापुराणे दशमस्कंधे चतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥ श्रीशुक उवाच ॥ कामस्तु वासुदे
वांशो दग्धः प्राग्रुद्रमन्युना ॥ देहोपपत्तये भूयस्तमेव प्रत्यपद्यत ॥ १ ॥ स एव जातो वैदर्भ्यां कृष्णवीर्यसमुद्भवः ॥ प्रद्युम्न इति वि
ख्यातः सर्वतोऽनवमः पितुः ॥ २ ॥

16

दुःखदुःखमत्त सुचन ॥ १ ॥ जांबवत्यादिविवाहेभ्यः प्रागेव प्रद्युम्नजन्म ततो विवाहास्ततः शंबरागारात् प्रद्युम्नस्यागमनं
पूत्रकथनप्रस्तावेपि प्रथमं प्रद्युम्नस्य जातमात्रस्य शंबरेणाहरणं निरूपितं प्रत्यागमनं तूत्तरकालीनमपि कथाप
र्यवसानायात्रैवोक्तमिति ॥ वासुदेवाधिष्ठितचित्तप्रभवत्वाद्वासुदेवांशः स्तोष्टहेतुत्वाद्रुद्रदेहोपपत्तये देहप्राप्तये ॥ ग्र

देवसंबंधाभावादिवनात्मनो जन्मादयोपि वक्तुं जन्मादीनां देहधर्मत्वमाह जन्मादपलितिनित्यनुकथ्यं तद्देहिनात्मनो ह्वालो ह्युदहे
हाभितिः आत्मनि जन्मादिप्रतीतिः देहजन्मादिनैवेति सदृष्टांतमाह कलानामिवेति इंदोः कलानामिव जन्माद्या नैवेंदोः
पश्यतद्योतः ॥ यथा च कलानाशादेव कुहूस्माविस्यां इंदुः क्षयमुच्यते ॥ तद्वदस्यात्मनो देहनाशादेव मृतिव्यवहारः इत्यर्थः ॥४७॥
नन्वात्मनो देहादिसंबंधाभावे कथं भोक्तृभोग्यभोगप्रतीतिरित्याशंक्य स्वप्नदृष्टांतेनेत्यमर्थं पन्नयाशयाने इति ॥ आत्मान

जन्मादयस्तु देहस्य विक्रिया नात्मनः क्वचित् ॥ कलानामिव नैवेंदोर्मृतिर्ह्यस्य कुहूरिव ॥४७॥ यथाशयान आत्मानं विषयान्
फलमेव च ॥ अनुभुंक्तेप्यसत्यर्थे तथाप्नोत्यबुधो भवं ॥४८॥ तस्मादज्ञानजं शोकमात्मशोषविमोहनं ॥ तत्वज्ञानेन निर्हृत्य
स्वस्था भवस्व चिंस्मिते ॥४९॥ श्रीशुक उवाच ॥ एवं भगवता तन्वी रामेण प्रतिबोधिता ॥ वैमनस्यं परित्यज्य मनो बुद्ध्या
समादधे ॥५०॥ प्राणावशेष उत्सृष्टो द्विड्भिर्हतबलप्रभः ॥ स्मरन्विरूपकरणं वितथात्ममनोरथः ॥५१॥ अहत्वा दुर्मतिं कृष्णम
प्रत्यूह्य च यवीयसीं ॥ कुंडिनं न प्रवेक्ष्यामीत्युक्त्वा तत्रावसद्रुषा ॥५२॥ चक्रे भोजकटं नाम निवासाय महत्पुरं ॥ भगवान्भीष्
मकसुतामेवं निर्जित्य भूमिपान् ॥ पुरमानीय विधिवदुपयेमे कुरूद्वह ॥५३॥ तदा महोत्सवो नृणां यदुपुर्यां गृहे गृहे
अभूदनन्यभावानां कृष्णे यदुपतौ नृप ॥५४॥ नरा नार्यश्च मुदिताः प्रमृष्टमणिकुंडलाः ॥ पारिबर्हमुपाजह्रुः वरयो

भोक्तारं विषयान्भोक्षान् फले भोगं अप्रसत्यप्यर्थे अनुभुंक्ते तथाबुधः संसारमाप्नोतीति ॥४८॥ आत्मानं शोषयति विमोहय
ति च इति तत्वज्ञानेन निर्हृत्यापोह्य ॥४९॥ समादधे समाहितमकरोत् ॥५०॥ रुक्मिणस्त्वेवं श्रुमवेतोनाशं न निवृत्तमिति दर्शयः
न्नाह प्राणावशेष इति ॥५१॥ अहत्वा इत्यादि दुर्मतिमिति च सूत्रार्थः अप्रत्युपानवर्त्यो भ्रातबुध्येतिनुत्सं ॥ यवीयसीं यत्रावि
रूपितस्तत्रैवावसत् तत्र भोजकटं नाम भवनं ॥५२॥ वरणे वरबंधोदेयमुपस्करं ॥५५॥

८.३० आकीर्यमाणो दिविजैः स्तुवद्भिः कुसुमोत्करैः। भार्ययाम्बरचारिण्या पुरं नीतो विहायसा ॥ २५ ॥

वज्रस्य निष्पेषनिष्ठुरः यो नादो भवति तथाभूतं नादं व्यनदन् सामान्यविशेषतया व्याप्यव्यापकत्वमेवादः नेयाः पचति। तिवत्। अतिनिष्ठुरं नादमकरोदित्यर्थः १६ वैहायसः आकाशस्थितः १७ सत्त्वात्मिकां सत्त्वगुणम
ना २

प्रभावेदे। विद्यां प्रद्युम्नाय महात्मने। मायावती महामायां सर्वमायाविनाशिनीं ॥ १६ ॥ स च शंबरमभ्येत्य संयु
२० गाय समाह्वयत्। अविषह्यैस्तमाक्षेपैः क्षिपन् संजनयन् कलिं ॥ १७ ॥ सोऽधिक्षिप्तो दुर्वचोभिः पदाहत इवोरगः। निश्च
क्राम गदापाणिरमर्षात्ताम्रलोचनः ॥ १८ ॥ गदामाविध्य तरसा प्रद्युम्नाय महात्मने। प्रक्षिप्य व्यनदन्नादं वज्रनि
ष्पेषनिष्ठुरं ॥ १९ ॥ तामापतंतीं भगवान् प्रद्युम्नो गदया गदां। अपास्य शत्रवे क्रुद्धः प्राहिणोत्स्वगदां नृप ॥ २० ॥ स च
मायां समाश्रित्य दैतेयीं मयदर्शितां। मुमुचेऽस्त्रमयं वर्षं कार्ष्णौ वैहायसोऽसुरः ॥ २१ ॥ बाध्यमानोऽस्त्रवर्षेण रौ १९
क्मिणेयो महारथः। सत्त्वात्मिकां महाविद्यां सर्वमायोपमर्दिनीं ॥ २२ ॥ ततो गौह्यकगांधर्वपैशाचोरगराक्ष
सीः। प्रायुंक्त शतशो दैत्यः कार्ष्णिर्व्यधमयत्स ताः ॥ २३ ॥ निशातमसिमुद्यम्य सकिरीटं सकुंडलं। शंबरस्य शिरः
17 कायात्ताम्रश्मश्र्वोजसाहरत् ॥ २४ ॥ अंतःपुरवरं राजन् ललनाशतसंकुलं। विवेश पत्न्या गगनाद्विद्युतेव बला
हकः ॥ २६ ॥ तं दृष्ट्वा जलदश्यामं पीतकौशेयवाससं। प्रलंबबाहुं ताम्राक्षं सुस्मितं रुचिराननं ॥ २७ ॥ स्वलंकृ
तमुखांभोजं नीलवक्रालकालिभिः। कृष्णं मत्वा स्त्रियो ह्रीता निलिल्युस्तत्र तत्र ह ॥ २८ ॥ अवधार्य शनैरीषद्वैल
क्षण्येन योषितः। उपजग्मुः प्रमुदिताः सस्त्रीरत्नं सुविस्मिताः ॥ २९ ॥

मायापुत्रेणेत्युत्तरस्यानुषंगः २१ ताः मायाः व्यधमयत् नाशयत् ताम्राणि श्मश्रूणि यस्य तत् ओजसा बलेन २४ वि
द्युता सह बलाहक इव मेघ इव २६ नीलाश्च वक्राश्च ये अलका एव अलयः तैः ह्रीताः लज्जिताः आश्चर्येण भवंतीति प्र

संप्रसिद्धः कामशत्रुः शंबरस्तमात्मनः शत्रुं विदित्वा समुद्रे प्रास्य प्रक्षिप्य गृहमगमदिति २ निर्जगार गिलितवान् ४ स्वधितिना
स्वधितिनापाकप्रवर्धनेखड्गेनवेतः ५ नतसकामांशपतेः पतिः उत्पत्तिं प्रतीक्षमाना रूढ क्रिष्णपुत्रः प्रभुत्पन्नः इति ६ यशस्विनी पतिव्रता भर्तृदेहप्राप्तिं

प्र

तं शंबरः कामरूपी हृत्वा तोकमनिर्दशं। सविदित्वात्मनः शत्रुं प्रास्योदन्वत्यगाद्गृहं ३ तं निर्जगार बलवान्मीनः सोप्यपरैः सह
वृतो जालेन महता गृहीतो मत्स्यजीविभिः ४ तं शंबराय कैवर्ता उपजह्रुरुपायनं। सूदा महानसं नीत्वावद्यन्स्वधितिना-
द्भुतं ५ दृष्ट्वा तदुदरे बालं मायावत्यै न्यवेदयन्। नारदोकथयत्सर्वं तस्याः शंकितचेतसः। बालस्य तत्वमुत्पत्तिं म-
त्स्योदरनिवेशनं ६ सा च कामस्य वै पत्नी रतिर्नाम यशस्विनी। पत्युर्निर्दग्धदेहस्य देहोत्पत्तिं प्रतीक्षती ७ निरूपिता
शंबरेण सा सूपौदनसाधने। कामदेवं शिशुं बुध्वा चक्रे स्नेहं तदार्भके ८ नातिदीर्घेण कालेन स कार्ष्णी रूढयौवनः
जनयामास नारीणां वीक्षंतीनां च विभ्रमं ९ सा तं पतिं पद्मदलायतेक्षणं प्रलंबबाहुं नरलोकसुंदरं सव्रीडहासो-
त्तभितभ्रुवेक्षती प्रीत्योपतस्थे रतिरंग सौरतैः १० तामाह भगवान्कार्ष्णिर्मातस्ते मतिरन्यथा। मातृभावमतिक्रम्य वर्त्त-
से कामिनी यथा ११ रतिरुवाच भवान्नारायणसुतः शंबरेण हृतो गृहात्। अहं तेधिकृता पत्नी रतिः कामो भवा-
न्प्रभो १२ एष त्वानिर्दशं सिंधावक्षिपच्छंबरोसुरः। मत्स्योग्रसीत्तदुदरादिह प्राप्तो भवान्प्रभो १३ तमिमं जहि दुर्धर्षं दु-
र्जयं शत्रुमात्मनः। मायाशतविदं त्वं च मायाभिर्मोहनादिभिः १४ परिशोचति ते माता कुररीव गतप्रजा। पुत्रस्नेहाकुला दीना

प्रतीक्षती प्रतीक्षमाणा ७ तं शिशुं कामदेवं बुध्वा विभ्रमं संमोहनं ८ अंगहे राजन् सौरतैर्भावैरूपतस्थे अभजत् ९ अधिकृता
पत्नी पत्न्यहं रहस्यभिर्भवान्कामः शंते १२ दुर्जयत्वे हेतुः मायाशतविदमिति कथं तर्हि हंतव्य इत्यत्राह मायाभिरिति १३ नचात्र विलंबः का-

इतिदशमेपंचपंचाशत्तमः॥षट्पंचाशत्तमेमिथ्याभियोगेमणिमाहरत्।कन्यांजांबवतःप्रापकृष्णःसत्राजितस्ततः॥का
प्रसेनवधस्यनिष्ठापुत्त्राप्रागगिरिचंचलां॥प्रथीस्यानर्थितामाहस्यमंतहरणादिना।सत्यभामाजांबवत्योर्विवाहप्रस्तावा
यस्यमंतकमाख्यानमाह . . . सत्राजितइतिसत्राजितइत्याकारांतः क्वचिन्नकारांतोप्यन्वयानुसारेणद्रष्टव्यः॥ हेतापरा

१९

इतिश्रीभागवतेमहापुराणेदशमस्कंधेपंचपंचाशत्तमोऽध्यायः॥५५॥श्रीशुकउवाच॥
सत्राजितःस्वतनयांकृष्णायकृतकिल्बिषः॥स्यमंतकेनमणिनास्वयमुद्यम्यदत्त
वान्॥१॥राजोवाच॥सत्राजितःकिमकरोद्ब्रह्मन्कृष्णस्यकिल्बिषं॥स्यमंतकः
कुतस्तस्यकस्माद्दत्तासुताहरेः॥२॥श्रीशुकउवाच॥आसीत्सत्राजितःसूर्योभक्त
स्यपरमःसखा॥प्रीतःतस्मैमणिं [illegible] प्रादात्सूर्यस्तुष्टःस्यमंतकं॥३॥सतंवि
19 भ्रन्मणिंकंठेभ्राजमानोयथारविः॥प्रविष्टोद्वारकांराजंस्तेजसानोपलक्षितः॥४॥

धर्मछात्रेयस्वयमेवोद्यम्यकृष्णायमणिनासहप्रादादिति॥भक्तस्यसत्राजितःसूर्यःस्वाम्यपिसखेवासीदित्यर्थः॥स १९
चतुष्टःतस्मैस्यमंतकंनाममणिंप्रादात्॥प्रीतःस्निग्धः॥नोपलक्षितःसत्राजित्तोसावित्यविज्ञातः॥४॥श्रीरामः॥

सुतं स्मरंस्ताह कोऽन्वयमिति ॥ नरवैदूर्य्यः पुरुषश्रेष्ठः ॥ ३१ ॥ ३२ एतेन तुल्यं वयो रूपं च यस्य सः ॥ ३३ तस्य स्वपुत्रत्वं संभावयंत्याह कथं न्विति ३३ तदेवाधिकं संभावयति ॥ स एवेति ॥ ३४ देवकानकदुंदुभ्यां देवकानकदुंदुभिभ्यामित्यर्थः ॥ ३५ प्रतिसोदर्ष्यि एवं प्रद्युम्नमनुवर्णयति ॥ यमिति षित्वा श्रीकृष्णः महत्वरूपे प्रद्युम्ने निज आत्मीयः ईशः भर्त्तेति भावी भावनापासांतात्तः

अप्यतत्राक्षिताषांशी वैदर्भी वल्गुभाषिणी ॥ अस्मात्स्वसुतं नष्टं स्नेहस्नुतपयोधरा ॥ ३७ कोऽन्वयं नरवैदूर्य्यः कस्य वा कमलेक्षणः ॥ धृतः कथा वा जठरे केयं लब्धा च नेन वा ३८ मम चाप्यात्मजो नष्टो नीतो यः सूतिकागृहात् ॥ एतत्तुल्यवयो रूपो यदि जीवति कुत्रचित् ३९ कथं त्वनेन संप्राप्तं सारूप्यं शार्ङ्गधन्वनः ॥ आकृत्यावयवैर्गत्या स्वरहासावलोकनैः ॥ ३३ स एव वा भवेन्नूनं यो मे गर्भे धृतोऽर्भकः ॥ अमुष्मिन्प्रीतिरधिका वामः स्फुरति मे भुजः ॥ ३४ एवं मीमांसमानायां वैदर्भ्यां देवकीसुत ॥ देवकानकदुंदुभ्यामुत्तमश्लोक आगमत् ॥ ३५ विज्ञातार्थोऽपि भगवांस्तूष्णीमास जनार्दनः ॥ नारदोऽकथयत्सर्वं शंबराहरणादिकं ॥ ३६ तच्छ्रुत्वा महदाश्चर्य्यं कृष्णान्तःपुरयोषितः ॥ अभ्यनंदन्बहूनब्दान्नष्टं मृतमिवागतं ॥ ३७ देवकी वसुदेवश्च कृष्णरामौ तथा स्त्रियः ॥ दंपती तौ परिष्वज्य रुक्मिणी च ययुर्मुदं ॥ ३८ नष्टं प्रद्युम्नमायातमाकर्ण्य द्वारकौकसः ॥ अहो मृत इवायातो बालो दिष्ट्येति हाब्रुवन् ॥ ३९ यं वै मुहुः पितृस्वरूपनिजभावास्तन्मातरो यदभजन्रहरूढभावाः ॥ चित्रं न तत्खलु रमास्पदबिंबबिंबे कामे स्मरेक्षाविषये किमुतान्यनार्यः ॥ ४० ॥ कृष्णपत्न्योऽपि रहसि निरूढभावाः सत्योऽपि अभजन्निति निपतन्न खलु चित्रं कथं सति तस्मिन्स्मरे स्मर्य्यमाणत्वेनैव देहकामित्वविषयेऽपि ॥ अक्ष्णामिंद्रियाणां विषये एतत्किंच मास्मदस्त्री कृष्णस्तस्य बिंबस्त्रीभर्त्तिस्तस्य बिंबे प्रति द्विं

श्री॥ ॐ ध॥ प्राहायुध्यगहेतिवा॥ १४॥ प्रजनपुरुषं पांस्ववोचन॥ १५॥ रुध्यर्थ॥ स्वामिनार्थे॥ १६॥ अष्टविंशाहं॥ अष्टचविंशतिरत्रकिदनाऽ
नियान्मेन तन॥ अष्टविंशत्यहं॥ अष्टविंशतिरात्रेति लोपः॥ प्रार्षः वज्रस्यानिष्पेषो निर्घातः तद्वनयत्कर्षे निष्ठुरे॥ १७॥ श्रीहरिरस्य

प्रसेनं सहयं हत्वा मणिमाच्छिद्य केसरी॥ गिरिं विशन्जाम्बवता निहतो मणिमिच्छता॥ १४॥ सोपि चक्रे कुमारस्य मणिं क्रीड
नकं बिले॥ अपश्यत्पन्भ्रातरं भ्राता सत्राजित्पर्यतप्यत॥ १५॥ प्रायो हि कृष्णेन निहतो मणिग्रीवो वनं गतः॥ भ्राता ममेति
तच्छ्रुत्वा कर्णे कर्णे जपन्जनाः॥ १६॥ भगवांस्तदुपश्रुत्य दुर्यशो लिप्तमात्मनि॥ मार्ष्टुं प्रसेनपदवीमन्वपद्यत नागरैः॥ १७॥
२० हतं प्रसेनमश्वं च वीक्ष्य केसरिणा वने॥ तं चाद्रिपृष्ठे निहतमृक्षेण ददृशुर्जनाः॥ १८॥ ऋक्षराजबिलं भीमं मन्धेन तम
सावृतं॥ एको विवेश भगवानवस्थाप्य बहिः प्रजाः॥ १९॥ तत्र दृष्ट्वा मणिश्रेष्ठं बालक्रीडनकं कृतं॥ हर्तुं कृतमतिस्तस्मि
न्नवतस्थेऽर्भकान्तिके॥ २०॥ तमपूर्वं नरं दृष्ट्वा धात्री चुक्रोश भीतवत्॥ तच्छ्रुत्वाभ्यद्रवत्क्रुद्धो जाम्बवान्बलिनां वरः॥ २०
॥ २१॥ स वै भगवता तेन युयुधे स्वामिनात्मनः॥ पुरुषं प्राकृतं मत्वा कुपितो नानुभाववित्॥ २२॥ द्वन्द्वयुद्धं सुतुमुलमुभयो
र्विजिगीषतोः॥ आयुधाश्मद्रुमैर्दोर्भिः क्रव्यार्थे श्येनयोरिव॥ २३॥ आसीत्तदष्टविंशाहमितरेतरमुष्टिभिः॥ वज्रनिष्पेष
परुषैरविश्रममहर्निशं॥ २४॥ कृष्णमुष्टिविनिष्पातनिष्पिष्टाङ्गोरुबन्धनः॥ क्षीणसत्वः स्विन्नगात्रस्तमाहातीव विस्मितः॥ २५॥

मुष्टितां विनिष्पातेरा घातैर्विनिष्पिष्टानिम्लायितानि॥ अङ्गानि ऊरुवं घनानि संधिस्थानानि यस्य स॥ १५॥

दीप्यतेक्रीडन्नेसूर्य्यायमितिशंकिताः संतः कथयामासुरिति ॥ ५ ॥ सूर्य्यनमस्कारायागांसंकल्पयित्वोद्दिश्य भक्त्या मांसवो
धनानिनाशयराणात्यादिति ॥ ६ ॥ भगस्त्विचक्रेणरश्मिजालेनभूखिनस्तिभासीक्षणगावोरपमयोपसमः ॥ ७ ॥ नवेदम्
घटमानमित्याह: नन्वेति ॥ अन्विच्छंतिमार्गयंति ॥ प्रजः स्वर्ग्यः ॥ वालामामसानावेचनंज्वलन् विद्योतमानः द्योतानि
कौतुकेनउत्सवेनमंगलानिपक्षिनःतविप्रः द्वेता ॥ ९ ॥ भारप्रमाणंच ॥ चतुर्भिर्व्रीहिभिर्गुंजामोगुंजाः पंचपाणंपः

तं विलोक्यजनानादूरात्तेजसामुष्टदृष्टयः ॥ दीप्यते हे भगवन्नेषांशुः सूर्य्यःशंकिताः ॥ ५ ॥ नारायणनमस्तेस्तुशंख
चक्रगदाधर ॥ दामोदरारविंदाक्षगोविंदयदुनंदन ॥ ६ ॥ एष आयाति सविताच्चांदिदृक्षुर्जगत्पते मुष्णन्नभास्तिच
क्रेणनृणांचक्षूंषितिग्मगुः ॥ ७ ॥ नन्वन्विच्छंतितेमार्गं त्रिलोक्यां विबुधर्षभाः ॥ आत्वाद्यगूढपदंयुद्रष्टुंयात्यजः प्र
भोः ॥ ८ ॥ श्रीशुक उवाच ॥ निशम्यबालवचनंप्रहस्याम्बुजलोचनः ॥ प्राह नासौ रविर्देवः सत्राजिन्मणिनाज्वल
न ॥ ९ ॥ सत्राजित्स्वगृहं श्रीमत्कृतकौतुकमंगलं ॥ प्रावेशयद्देवसदने मणिं विप्रैर्निवेशितं ॥ १० ॥ दिने दिने स्वर्णभारान्
ष्टौ ससृजति प्रभो ॥ दुर्भिक्षमार्यरिष्टानिसर्पाधिव्याधयोऽशुभाः ॥ ११ ॥ नसंतिमायिनस्तत्रयत्रास्तेभ्यर्चितोमणिः
सयाचितोमणिंक्वापियदुराजाय शौरिणा ॥ नैवार्थकामुकः प्रादात् याच्ञाभंगमतर्कयन् ॥ १२ ॥ तमेकदामणिं
कंठे प्रतिमुच्यमहाप्रभं ॥ प्रसेनोहयमारुह्यमृगयांव्यचरद्वने ॥ १३ ॥

णान् अष्टौधारणम्यष्टौचकर्षतांश्चतुरः पलं ॥ तुलांपलशतं प्राहुर्भारः स्याद्विंशतिस्तुला इति ॥ ११ ॥ मारिसमाकालमृत्युः श्री
हमभं: अशुभं दुःस्वप्नादयः ... अपिकदाचित् ॥ अनेनभगवत्यसमर्थ्यस्वयमग्रेभाविनः सर्वानिष्टनिवर्त्तकमपि ॥ अनिष्टहंतुरेवं

...तमेकदेतिप्रतिमुच्य
भवतीतिस्फचिंता ॥ १४ ॥ नवेवदर्शीपि...
ध्वाप्रसेनः सत्राजिद्भ्राता ॥ १३ ॥

द० ३०

अलं भगवान्प्राप्येच कन्याणां नाम दुर्गामभजन ॥२३॥ सच कृष्णस्तेषां प्रादुर्बभूव ॥ प्रसव इति पाठे ॥ प्रसव इंद्रिया इति तेषां प्रेष्ट्रत्य
र्थः ॥ कदा देव्या उपस्थानात् तयांतान्प्रति ॥ प्रादिष्टा दत्ता या ॥ आशीः कृष्णं द्रक्ष्यथेति ॥२४॥ तया सह एवं यदि लोकैर्जनाः कथं
चिन्मृतं बंधुं पुनरागतमुपलभंते तद्वदुपलभ्य सर्वे जातमहोत्सवा ॥ आसन्निति ॥२५॥ पापात्मा ॥ अपराधेनानुतप्यमानेन ॥

॥ प्रहृष्टा निर्गमं शौरेः प्रविष्टस्य बिलं जनाः ॥ प्रतीक्ष्य द्वादशाहानि दुःखिताः स्वपुरं ययौ ॥२३॥ निशाम्य देवकी देवी रुक्मि
ण्यानकदुंदुभिः ॥ सुहृदो ज्ञातयोऽशोचन् बिलात् कृष्णमनिर्गमं ॥२४॥ सत्राजितं शपंतस्ते दुःखिता द्वारकौकसः ॥ उ
पतस्थुर्महामायां दुर्गां कृष्णोपलब्धये ॥२५॥ तेषां तु देव्युपस्थानात् प्रत्यादिष्टाशिषा स ह ॥ प्रादुर्बभूव सिद्धार्थः सदा
२१ रो हर्षयन् हरिः ॥२६॥ उपलभ्य हृषीकेशं मृतं पुनरिवागतं ॥ सहपत्न्या मणिग्रीवं सर्वे जातमहोत्सवा ॥२७॥ सत्रा
जितं समाहूय सभायां राजसन्निधौ ॥ प्राप्तिं चाख्याय भगवान् मणिं तस्मै न्यवेदयत् ॥२८॥ स चातिव्रीडितो रत्नं गृ
हीत्वावाङ्मुखस्ततः ॥ अनुतप्यमानो भवनमगमत्स्वेन पाप्मना ॥२९॥ सोनुध्यायंस्तदेवाघं बलवद्विग्रहाकुलः ॥
कथं मृजाम्यात्मरजः प्रसीदेद्वाच्युतः कथं ॥३०॥ किं कृत्वा साधु मह्यं स्यान्न शपेद्वा जनो यथा ॥ अदीर्घदर्शनं क्षुद्रं २१
20 मूढं द्रविणलोलुपं ॥३१॥ दास्ये दुहितरं तस्मै स्त्रीरत्नं रत्नमेव च ॥ उपायोयं समीचीनः तस्य शांतिर्न चान्यथा ॥३२॥

॥ अघं दोषं ॥ आत्मनो रजो मलं ॥ अपराधमिति ॥२९॥ किं कृत्वा स्वामिन् कृष्ण इति शेषः ॥ साधु भद्रं ॥ अदीर्घदर्शनं ॥ अविचारक
मो क्षुद्रं कृपणं मूढं मूढमति ॥३१॥ एवं ध्यायन् उपायं निश्चिनोति दास्य इति स्त्रीरत्नं दुहितरं तावद्दास्यामि नदनेतरं पारवहणरत्नमपीति ॥३२॥

नृलोके कोपमत्तः वलियानेति विस्मितः सन् विमृश्याह जानइति सर्वभूतानां यः प्राणः तत्र च पदोजः सहो वलं इंद्रि
यदेहवलानि तत्सर्वं च मित्यहं जाने कथं तथा च मत्त ॥ प्राह विष्णुमित्यादि ॥ १६ ॥ पुराणो यो हेतुः त्वं हीति त्वष्टामि
भिन्नपञ्चसन् उपादाने ॥ प्रजः पुराणः प्रभविष्णु सेहेतुः कोल इति ॥ पृथ्वीश्वर त्वमप्यतः एवेत्याह ईशः पर इति
न चतत् दृश्य इत्याह ॥ प्रात्मनामात्मेति ॥ १७ ॥ यत एवंभूतः ॥ प्रजः मम एष्टदेव रघुनाथ एव त्वमित्याह ॥ यस्येति ईषत् उ
त्कलितः उद्दीपितरोषस्तेन कटाक्ष मोक्षात् क्षुभिता नक्रा ग्राहा स्ति मिंगिला महामत्स्या श्चयस्मिन्सो धिर्वर्त्मा दिशत् द
जानेत्वां सर्वभूतानां प्राणः ॥ प्रोज सहो वलं ॥ विष्णुं पुराणं पुरुषं प्रभविष्णुमधीश्वं ॥ १६ ॥ त्वं हि विश्वसृजां स्रष्टा सृज्या
नामपि यच्च सत् ॥ कालः कलयतामीशः परः आत्मात्मनामात्मनां ॥ १७ ॥ यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्मादिशत्
क्षुभितनक्रतिमिंगिलोब्धिः ॥ सेतुः कृतः स्वयश उज्ज्वलिता च लंका रक्षः शिरांसि भुवि पेतुरिषुक्षतानि ॥ १८ ॥ इति वि
ज्ञातविज्ञानमृक्षराजानमच्युतः ॥ व्याजहार महाराज भगवान्देवकीसुतः ॥ १९ ॥ अभिमृश्यारविंदाक्षः पाणिना
शंकरेण तं ॥ कृपया परमा भक्तं मेघगंभीरया गिरा ॥ २० ॥ मणिहेतोरिह प्राप्ता वयमृक्षपते विलं ॥ मिथ्याभिशापं प्रम
अतः प्रात्मनामपि नामुना ॥ २१ ॥ इत्युक्तः स्वां दुहितरं कन्यां जाम्बवतीं मुदा ॥ अर्हणार्थं समणिना कृष्णायोपजहार ह ॥ २२ ॥
त्वान् ॥ यथापि तस्मिन् येन स्वयश एव सेतुः कृतः उज्ज्वलिता दग्धा यस्येषुभिः क्षतानि रक्षणे दशग्रीवस्य शिरांसि भुवि पे
तुः स एव त्वमिति शाने ॥ १८ ॥ इति विज्ञाततं विज्ञानं येन तं विज्ञानशब्दः करणसाधनः कर्मसाधनो वा ऋक्षराजं प्रति उक्तवान् ॥ २० ॥
वयं त्विह वहन्तो विलज्ज्वां प्राप्ताः तत्र मिथ्याभिशापमुमुक्षु नाम एनिना प्रमज्जन प्रमाष्टुं महमत विलं प्राप्ता इत्यर्थः ॥ २१ ॥ सह मणे

जगामिवारन्नगाम ॥५॥ हेलनं प्रतिकूलं च जिनेः प्रपराधं ॥६॥ प्रपीतो मत्तः सप्तदशाखंडव्यामकात् संयुगात् ॥७॥ तौ रामकृष्णौ
वेकश्च वनन्त्रोमत्स्य भिप्रेत्याह ॥ यद्ददभिति ॥ प्रजपामापयामो हित्वा जये निसंधिराष्टः ॥८॥ प्रतर्याभिकृष्णे नियुक्तान्तसि
एवं भक्त्र भनितिस्त्वा भ्यां सत्राजित मसन्तमः शयानमवधील्लोभात् सपापः क्षीणजीवितः ॥५॥ स्त्रीणां विक्रोशमानानां क्रं
दंतीनामनाथवत् ॥ हत्वा पशून् सौनिकवन्मणिमादाय जग्मिवान् ॥६॥ सत्यभामा च पितरं हतं वीक्ष्य शुचार्पि
२२ ता ॥ व्यलपत्तात तातेति हा हतास्मीति मुह्यती ॥७॥ तैलद्रोण्यां मृतं प्रास्य जगाम गजसाह्वयं ॥ कृष्णाय विदिता
र्थाय तप्ताचख्यौ पितुर्वधं ॥८॥ तदाकर्ण्येश्वरौ राजन्ननुसृत्य नृलोकतां ॥ अहो नः परमं कष्टमित्यास्राक्षौ
विलेपतुः ॥९॥ आगत्य भगवांस्तस्मात् सभार्यः साग्रजः पुरं ॥ शतधन्वानमारेभे हन्तुं हर्तुं मणिं ततः ॥१०॥
21 सोपि कृतोद्यमं ज्ञात्वा भीतः प्राणपरीप्सया ॥ साहाय्ये कृतवर्माणमयाचत स चाब्रवीत् ॥११॥ नाहमीश्वरयोः
कुर्यां हेलनं रामकृष्णयोः ॥ को नु क्षेमाय कल्पेत तयोर्वृजिनमाचरन् ॥१२॥ कंसः सहानुगोऽपीतो यद्द्वेषात्त्याजि २२
तः श्रिया ॥ जरासंधः सप्तदश संयुगाद्विरथो गतः ॥१३॥ प्रत्याख्यातः स चाक्रूरं पार्ष्णिग्राहमयाचत ॥ सोप्या
३१ ह को विरुध्येत विद्वानीश्वरयोर्बलं ॥१४॥ य इदं लीलया विश्वं सृजत्यवति हन्ति च ॥ चेष्टां विश्वसृजो य
स्य न विदुर्मोहिताजया ॥१५॥ यः सप्तहायनः शैलमुत्पाट्यैकेन पाणिना ॥ दधार लीलया बाल उच्छिलींध्रमिवा
र्भकः ॥१६॥ नमस्तस्मै भगवते कृष्णायाद्भुतकर्मणे ॥ अनंतायादिभूताय कूटस्थायात्मने नमः ॥१७॥ प्रत्याख्यातः
स तेनापि शतधन्वा महामणिं ॥ तस्मिन्न्यस्याश्वमारुह्य शतयोजनगं ययौ ॥१८॥ गरुडध्वजमारुह्य रथं राम
जनार्दनौ ॥ अन्वयातां महावेगैरश्वै राजन् गुरुद्रुहं ॥१९॥ टीका ॥ अक्रूरेण ॥ मन्यस्य येपलायत ॥ १९ ॥ गुरुः स्वसरस्तं वा ॥ १९ ॥

वृष्णिभिः कृतवर्मादिभिः ॥२२॥ मणिं न प्रतीच्छामः न स्वीकुर्मः देवः सूर्य्यस्तत्र कस्येति कटाक्षः फलभागिन इति तत्राप्युत्तरमाह
स्वदीयं धनमस्माकं भवेतीति गूढाभिप्रायः ॥ इति दशमे षट्पंचाशत्तमः ॥५६॥ सप्तपंचाशत्तमे तु पुनः शतधनुर्वधे ॥ आप्तस्व
दुर्धर्षो माधवः स्मो क्रूराहृतात्मरोः ॥१॥ प्रक्रूरमुररीकृत्य मणिं पापं भयाच्युतः उपमंत्र्य तमेकांते सरामे गतो लाक्षे
सत्राजितः ॥२॥ श्रीकृष्णस्तु भगवत्फलेयत्तीकर्त्तुमाह सांतार्थोऽपि ॥ पांडवा बिलद्वारेण जतुगृहान्निर्गता इत्येवं विज्ञातार्थोऽपि येन सः

एवं व्यवसितो बुद्ध्या सत्राजित्स्वसुतां शुभां ॥ मणिं च स्वयमुद्यम्य कृष्णायोपजहार ह ॥२३॥ तां सत्यभामां भगवा
नुपयेमे यथाविधि ॥ बहुभिर्याचितां शीलरूपौदार्यगुणान्वितां ॥२४॥ भगवानाह न मणिं प्रतीच्छामो वयं नृप
तवास्तां देवभक्तस्य वयं च फलभागिनः ॥२५॥ इति श्रीभागवते महापुराणे दशमस्कंधे स्यमंतकाहरणं षट्पंचा
शत्तमोऽध्यायः ॥५६॥ श्रुक० विज्ञातार्थोऽपि गोविंदो दग्धानाकर्ण्य पांडवान् ॥ कुंतीं च कुल्यकरणे सहरामो ययौ कु
रून् ॥१॥ भीष्मं कृपं स विदुरं गांधारीं द्रोणमेव च ॥ तुल्यदुःखौ च संगम्य हा कष्टमिति होचतुः ॥२॥ लब्ध्वैतदंतरं राजन् श
तधन्वानमूचतुः ॥ अक्रूरकृतवर्माणौ मणिः कस्मान्न गृह्यते ॥३॥ योऽस्मभ्यं संप्रतिश्रुत्य कन्यारत्नं विगर्ह्य नः ॥ कृ
ष्णायादान्न सत्राजित् कस्माद्भ्रातरमन्वियात् ॥४॥ ॥

कुंतीं च दग्धानाकर्ण्य कुल्यकरणे कुलोचितव्यवहारार्थं ॥१॥ अन्येषां तद्दुदुःखाजनात् ॥ भीष्मादीनां संगम्येत्युक्तं
॥२३॥ ननु जीवत्सत्राजित् कथं मणिं दास्यति ॥ तत्राहतुः योऽस्मभ्यमिति भ्रातरं प्रसेनं मृतं कस्मान्नान्वियात् नानु

६०मुः

॥ मुषनुः धारकायाः सकाशात्क्षा । पिपला । यिनो ॥ प्रयोजको मणिहरणे शत धन्वनः प्रवर्त्तको नत्राक्रूरः कृष्णमनुमते
मैवगतः कृतवर्म्मानुमन्ते ॥ पक्षपात प्राकट्यभयादिवोपेक्षित इति गम्यते ॥ कथमन्यथा सर्वचेष्टस्व वेचनं तयोः संभवती
ति ॥ २१ ॥ तदेव श्री वाराणस्यां दानपति समाख्यया मणिहस्ते ऽक्रूरे कक्षवेदिके र्म्महाध्वरै र्यजमाने निवसति सति पुनः
श्री कृष्णेनैव प्राषितोऽक्रूरः इति कर्णाकर्णिं जयति जने सत्यभामा रामादीनामप्याविश्वासे जनसंग्रहायाक्रूरमाहूय सादरः

२३

ऽक्रूरः कृतवर्माणो शत्वा शत धनुर्वधं ॥ मुषनु भय विन्नस्तो धारकायाः प्रयोजको ॥ २२ ॥ ऽक्रूरे प्रा २३
षिते रिष्टान्यासन्वै धारकौकसां शारीरा मानसा ह्लापा मुहुर्दैविक भौतिका ॥ २३ ॥ इत्यंगोपदिशं त्ये
केविस्मृत्य प्रागुदाहृतं ॥ मुनिवास निवासे किं घटेतारिष्टदर्शनं ॥ २४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

22

पं श्री कृष्णः प्राहदुदंच भगवान्मतं सप्यके चनत्तं ऋषयो न्यत्कारणमक्रूरानयनेवर्णयंति ॥ तद्याय्यातं दूषयितुमनुव
दति ॥ ऽक्रूरे प्राषिते इति ॥ २० ॥ दूषयति ईत्यंति ऽंगहेराजन् श्री कृष्णमाहात्म्यं विस्मृत्येति तदेषा हमुनिवास इति मुनीनानि
वासो यस्मिन्समुनिवासः श्री कृष्णस्तस्य निवासे सति ॥ ऽक्रूराय गमनयात्रेणारिष्टदर्शने किं घटेनतदृष्टि विवक्

[illegible] ॥ ३ ॥

शतयोजनमात्रगामिहयात्ततः परं गन्तुमशक्तः तत्र पतितमश्वं हयं विसृज्य २० व्यचिनोत् अमृगयामास प्रकृते मणिरास्त्री
ति सर्वस्तत्यापि विदितापि रामं वंचनायैतथा हतवानिति भावः अन्विष्य २३ सर्वासस्ये वं वैदेहिं मैथिलं च नायेति मन्वागू

मिथिलायामुपवने विसृज्य पतितं हयं ॥ पद्भ्यामधावत्संत्रस्तः कृष्णोप्यन्वद्रवद्रुषा ॥ २० ॥ पदातेर्भगवांस्तस्य पदातिस्ति
ग्मनेमिना ॥ चक्रेण शिर उत्कृत्य वाससोर्व्यचिनोन्मणिं ॥ २१ ॥ अलब्धमणिरागत्य कृष्ण आहाग्रजान्तिके ॥ वृथा हतः
शतधनुर्मणिस्तत्र न विद्यते ॥ २२ ॥ तत आह बलो नूनं स मणिः शतधन्वना ॥ कस्मिंश्चित्पुरुषे न्यस्तस्तमन्वेष पुरं व्रज
॥ २३ ॥ अहं विदेहमिच्छामि द्रष्टुं प्रियतमं मम इत्युक्त्वा मिथिलां राजन् विवेश यदुनंदनः ॥ २४ ॥ तं दृष्ट्वा सहसोत्थाय मै
थिलः प्रीतमानसः ॥ अर्हयामास विधिवदर्हणीयं समर्हणैः ॥ २५ ॥ उवास तस्यां कतिचिन्मिथिलायां समा विभुः
ततोशिक्षद्गदां काले धार्त्तराष्ट्रः सुयोधनः ॥ २६ ॥ मानितः प्रीतियुक्तेन जनकेन महात्मना ॥ केशवो द्वारका
मेत्य निधनं शतधन्वनः ॥ अप्राप्तिं च मणेः प्राह प्रियायाः प्रियकृद्विभुः ॥ २७ ॥ ततः स कारयामास क्रिया बंधोर्हतस्य
वै ॥ साकं सुहृद्भिर्भगवान्या याः स्युः सांपरायिकाः ॥ २८ ॥

धनुषा सह ॥ अहमिति ॥ २४ ॥ कतिचित्समाः संवत्सरान् प्रासंगिकमाह तत इति ॥ २६ ॥ सत्यभामामप्यवंचयदितीस्वच
यन्नाह केशव इति ॥ २७ ॥ बंधोः सत्राजितः सांपरायिकाः पारलौकिकाः ॥ २८ ॥ श्रीरामजी कृष्णायनमः श्री श्री श्री

द० ३८

प्राल ब्धवृत्तः हृदिस्थ इवाभवत् ॥४०॥ ततः मिथ्याभिशापसंमज्य प्रम्लैर्दुर्बुरित्यादिमिषेण प्राप्त्या भूयस्तस्मै प्रत्यर्पितवानिति ॥ दुःकी
र्तिं तन्मूलदुरितं च ॥४२॥ इति दशमे सप्तपंचाशत्तमः ॥५७॥ अष्टपंचाशत्तमे तु हरिः पंचकोरगृहान् ॥ कालिंदीमित्रविंदां च सत्यां
भद्रां च लक्ष्मणाम् ॥१॥ कालिंदी निजलाभाय तपः परमुपेयुषी ॥ परिणेष्यन् प्रियावासं मिंद्रप्रस्थमथागमत् ॥२॥ प्रतीतान्दृष्ट्वा
एवं साममिरालब्धस्य फल्कान्तनयोमणिं ॥ आदाय वाससा छन्नं ददौ सूर्यसमप्रभं ॥४०॥ स्यमंतकं दर्शयित्वा ज्ञातिभ्यो रजः
आत्मनः ॥ विमृज्य माणिना भूपः तस्मै प्रत्यर्पयत्प्रभुः ॥४१॥ यस्त्वेतत् भगवत ईश्वरस्य विष्णोर्वीर्याढ्यं वृजिनहरं सुमंगलं च
॥ आख्यानं पठति शृणोत्यनुस्मरेत् वा दुःकीर्तिं दुरितमपोह्य याति शांतिं ॥४२॥ इति श्रीभागवते महापुराणे दशम
स्कंधे स्यमंतकोपाख्याने सप्तपंचाशत्तमोध्यायः ॥५७॥ श्रीशुक उवाच ॥ एकदा पांडवान्द्रष्टुं प्रतीतान्पुरुषोत्तमः ॥ इंद्र
प्रस्थं गतः श्रीमान् युयुधानादिभिर्वृतः ॥१॥ दृष्ट्वा तमागतं पार्था मुकुंदमखिलेश्वरं ॥ उत्तस्थुर्युगपद्वीराः प्राणा
मुख्यमिवागतं ॥२॥ परिष्वज्याच्युतं वीरा अंगसंगहतैनसः ॥ सानुरागस्मितं वक्त्रं वीक्ष्य तस्य मुदं ययुः ॥३॥ युधिष्ठिर
स्य भीमस्य कृत्वा पादाभिवंदनं ॥ फाल्गुनं परिरभ्याथ यमाभ्यां चाभिवंदितः ॥४॥ परमासनं आसीनं कृष्णा कृष्णम
निंदिता ॥ नवोढा व्रीडिता किंचित् शनैरेत्याभिवंदत ॥५॥ तथैव सात्यकिः पार्थैः पूजितश्चाभिवंदितः ॥ निषसा
दासनेन्ये च पूजिताः पर्युपासत ॥६॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

२४

23

नपि द्रुपदशहे पुनेः सर्वैर्दृष्टान् युयुधानः सात्यकिः ॥१॥ प्राणाः इंद्रियाणि मुख्यं पंचवृत्तिं प्राणमिव ॥२॥ त्येष्टयोः प्रणा
मं कृत्वा समेनालिंगनः कनिष्ठाभ्यामभिवंदितो बभूव ॥५॥ कृष्णा द्रौपदी बहुभार्यासत्यपि निंदारहिता ॥ पार्थैर्नैवमचिरमूढा

व

पुनस्तन्मनभेवानुवर्णयति॥ काशिदेशेषु देवेसघन्यनवर्षतिसति॥ २१॥ इत्येवंभूतमक्रूरमहिमाप्रतिपादनपरंवृद्धानांवाक्यं श्रुत्वासत्यमेवंतथाप्येतावदेवकारणंनभवति किंतुमणेरप्ययंप्रभावइतिमन्वे ॥ एतत्स्वरभतं॥ वस्तुतस्तुश्रीहरेर्लीलावशा देवाशिष्टदर्शनमितिभाव॥ २४॥ विज्ञातमखिलंयेनसचासौ॰प्रवणवचित्तस्य ॰प्रयंभावः महाभागवतस्यास्यमयादत्तेपिमणौ

देवेवर्षतिकाशीशः स्वफल्कायागतायवै॥ स्वसुतांगांदिनीप्रादात्ततोवर्षतिस्मकाशिषु॥ ३२॥ तत्सुतः तत्प्रभावोसावक्रूरोयत्रयत्रह॥ देवोभिवर्षतितत्रनोपतापानमारिकाः॥ ३३॥ इतिवृद्धवचःश्रुत्वानैतावदिहकारणं॥ इतिमत्वासमानीयप्राहाक्रूरंजनार्दनः॥ ३४॥ पूजयित्वाभिभाष्यैनंकथयित्वाप्रियाःकथाः॥ विज्ञाताखिलचित्तज्ञःस्मयमानउवाच ह॥ ३५॥ ननुदानपतेन्यस्तस्त्वय्यास्तेशतधन्वना॥ स्यमन्तकोमणिः श्रीमान्विदितःपूर्वमेवनः॥ ३६॥ सत्राजितोनपत्यत्वात्गृह्णीयुर्दुहितुःसुताः॥ दायंनिनीयापःपिंडान्विमुच्यर्णंचशेषितं॥ ३७॥ तथापिदुर्धरस्त्वन्यैस्त्वय्यास्तांसुव्रतेमणिः॥ किंतुमामग्रजःसम्यक्नप्रत्येतिमणिंप्रति॥ ३८॥ दर्शयस्वमहाभागबंधूनांशांतिमावह॥ ॰व्युच्छिन्नामखास्तेद्यवर्तंतेरुक्मवेदयः॥ ३९॥
॥॥॥

वपदाद्यैवयस्मादाहृत्ताभाग्यनसहेवागतइतिस्त्रोति॥ ३५॥ सत्राजितःकिमतः ॰प्राह॥ सत्राजितइति॰प्रपःपिंडाश्चनिनीयदत्वा तत्रोर्णंचविमुच्यापकृत्यशेषितंमवशिष्टंदायंदुहितुःसत्यभामायाःसुताःगृह्णीयुरितिशास्त्रं॥ तथाचस्मरंति पत्नीदुहितारश्चैवपितरोभ्रातरस्तथा॥ तत्सुतागोत्रजावंधुःशिष्याःसब्रह्मचारिणःइति॥ ३७॥ ॰प्रग्रजोपिनप्रत्येतिनविश्वसिति॥ ३८॥ ना

३९ [illegible]

वीभत्सुरर्जुनः ॥ २२ ॥ सख्यास्त्री हृष्टमेन २५ ह्येमाकामयेदितिशंकायामाह नान्यमिति २१ ॥ श्रादावेवतद्विद्वान् २२ ॥ प्रसंगान्ना
कालीनं चित्रितांतस्माह यदैवेति ॥ पार्थार्थं देवसंदिष्टो विज्ञापितः श्रीकृष्णेनत्दैवतेषां विश्वकर्मणा देवशिल्पिनानगरं का
रयामास ॥ २४ ॥ किंच भगवान्निरतिशयैश्वर्यगुणवान् श्रपि श्रर्जुनस्यधनुरादिलाभायसारथिरासखांडवमेद्रस्यवन २५ ॥ प्र

२९ प्रशीतः परिश्रांतोवीभत्सुर्यमुनामगात् ॥ २२ ॥ तत्रोपस्पृश्यविशदंपीत्वावारिमहारथौ ॥ कृष्णौ ददृशतुः कन्यांचरंतींचारुद
२५ र्शनां ॥ २७ ॥ तमासाद्यवरारोहांसुद्विजांरुचिराननां ॥ पप्रच्छप्रेषितः सख्याफाल्गुनः प्रमदोत्तमां ॥ २४ ॥ कात्वंकस्यासिसुश्रो
णिकुतोवाकिंचिकीर्षसि ॥ मन्येत्वांपतिमिच्छंतींसर्वंकथयशोभने ॥ २४ ॥ कालिंद्युवाच ॥ अहंदेवस्यसवितुर्दुहितापतिं
२ मिच्छती ॥ विष्णुंवरेण्यंवरदंतपः परममास्थिता ॥ २० ॥ नान्यंपतिंवृणेवीरतमृतेश्रीनिकेतनं ॥ तुष्यतांमेसभगवान्
मुकुंदोनाथसंश्रयः ॥ २१ ॥ कालिंदीतिसमाख्याताव्सामियमुनाजले ॥ निर्मितेभवनेपित्रायावदच्युतदर्शनं ॥ २२ ॥ तथावदद्गु
डाकेशोवासुदेवायसोपितां ॥ रथमारोप्यतद्विद्वान्धर्मराजमुपागमत् ॥ २३ ॥ यदैवकृष्णः संदिष्टः पार्थानांपरमाद्भुतं ॥ कारयाम २५
मासनगरंचित्रंविश्वकर्मणा ॥ २४ ॥ भगवांस्तत्रनिवसन्स्वानांप्रियचिकीर्षया ॥ अग्नयेखांडवंदातुमर्जुनस्यासस
२४ सारथिः ॥ २५ ॥ सोग्निस्तुष्टोधनुरदाद्धयान्श्वेतान्रथंनृप ॥ अर्जुनायाक्षयौतूणौवर्मचाभेद्यमस्त्रिभिः ॥ २६ ॥ मय
श्चमोचितोवह्नेः सभांसख्यउपाहरत् ॥ यस्मिन्दुर्योधनस्यासीत्जलस्थलदृशिभ्रमः ॥ २७ ॥ सतेनसमनुज्ञातः सुहृ
द्भिश्चानुमोदितः ॥ आययौद्वारकांभूयः सात्यकिप्रमुखैर्वृतः ॥ २८ ॥

नयोः पुत्तपसापके ॥ २३ ॥ खांडवदाहकवन्हेः सख्येऽर्जुनायययस्मिन्नितिसामान्यतोनिर्देशः यस्यामित्यर्थः जलस्थलयोः
दृष्टेभ्रमः यथयत्राजलेस्थलवत्दृष्टिर्यस्मिन्तत्जलस्थलदृक् तस्मिन्भ्रमआसीत्इति ॥ २८ ॥ श्रीकृष्ण

॰प्रतिहार्द्दैनस्नेहेन॰प्राद्रिसजस्तेहृरोपयस्यास्तयापरिष्वक्तः तयापरिपृष्टावां धवायसस॥७॥प्रेम्नावैक्लव्यंनेनरुद्ध
कण्ठोयपोः क्लेशापापे॰प्रात्मानदर्शने यस्यत्तत्तजत्तांभक्तानाक्लेशापापय॰प्रात्मिनंदर्शयत्तीतिवा॥८॥सातीन्वेधुरवनः॰प्र
स्मान् यदाभ्रातो॰प्रक्रूरः प्रोषितः सातीत्रितिवचनात् प्राप्तमोहवारयंतिस्तोतिनतेक्ष्मीतिनत्रहेतुःविश्वस्येतिसु

घृष्यांसमागत्यकृताभिवंदनस्तथानिहार्द्दाद्रिहृस्राभिरंभितः॥॰प्रापृष्टवांस्तांकुशलंसहस्नुषांपितृस्वसारंपरिपृष्टवं
धवा॥७॥तमाहप्रेमवैक्लव्यरुद्धकंठाश्रुलोचिनः॥स्मरंतीतान्बहून्क्लेशान्क्लेशापापात्मदर्शनं॥८॥तदैवकुशलंनो
भूत्सनाथस्तेकृतावयं॥सातीन्त्रः स्मरताकृष्णभ्रातामेप्रेषितस्त्वया॥९॥नतोस्तिस्वपरभ्रांतिर्विश्वस्यसुहृदात्म
नः॥तथापिस्मरतांशश्वत्क्लेशान्हांसिहृदिस्थितः॥१०॥युधिष्ठिरोवाच॥किंनः॰प्राचरितंश्रेयोनवेदाहमधीश्वर॥
योगेश्वराणांदुर्दर्शोयन्नोदृष्टः कुमेधसां॥११॥इतिवैवार्षिकान्मासान्राज्ञासोभ्यर्थितः सुखं॥जनयन्नयना
नंदमिंद्रप्रस्थौकसांविभुः॥१२॥एकदारथमारुह्यविजयोवानरध्वजं॥गांडीवंधनुरादायतूणौचाक्षयसायकौ
॥१३॥साकंकृष्णेनसंनद्धोविहर्तुंविपिनंवनं॥बहुव्यालमृगाकीर्णंप्राविशत्परवीरहा॥१४॥तत्राविध्यत्शरैर्व्याघ्रा
न्॥शूकरान्महिषान्रुरून्शरभान्गवयान्खड्गान्हरिणान्शशशल्लकान्॥१५॥तान्निन्युःकिंकराराज्ञेमेध्या
न्पर्वण्युपागते॥१६॥

[illegible]

हृद्धं॰प्रात्माचन्तस्यहंसिनाशयसि॥१०॥कुमेधसांविषयासक्तचित्तानांदृष्टोसि॥११॥सुखमवसदितिशेषः सुखमभ्यर्थि
तइतिवाविभुःसमर्थो॥१२॥कालिंदीदर्शनप्रसंगमाहएकदेति॰प्रक्षयासायकाययोस्तौतूणौइषुधी॥१३॥राज्ञेयुधिष्ठिरायमे

हे नरेंद्र राजन्यबंधोः क्षत्रियस्य शुल्कदाः द्रव्यादिप्रदाः ॥४०॥ गुणानामेकमेव धाम स्थानं यः तथाभूतस्य यस्य तवांगे ॥४१॥ दुर्दान्ता
अप्रशिक्षिताः दुरवग्रहाः अप्रधराः पत्ता (?) अमस्तदाह एतैरिति भग्नजंगाः प्राप्ताः ॥४३॥ यत् यदि एतानि यान् गृह्णाति तस्य कन्या इति

श्रीभगवानुवाच ॥ नरेंद्र याच्ञा कविभिर्विगर्हिता राजन्यबंधोर्निजधर्मवर्तिनः ॥ तथापि याचे तव सौहृदेच्छया कन्यां त्वदीयां
न हि शुल्कदा वयं ॥४०॥ राजोवाच ॥ कोऽन्यस्तेऽभ्यधिको नाथ कन्यावर इहेप्सितः ॥ गुणैकधाम्नो यस्यांगे श्रीर्वसत्यनपा-
यिनी ॥४१॥ किंत्वस्माभिः कृतः पूर्वं समयः सात्वतर्षभ पुंसां वीर्यपरीक्षार्थं कन्यावरपरीप्सया ॥४२॥ सप्तैते गोवृषा वीर दुर्दा-
२६ न्ता दुरवग्रहाः ॥ एतैर्भग्नाः सुबहवो भिन्नगात्रा नृपात्मजाः ॥४३॥ यदिमे निगृहीताः स्युस्त्वयैव यदुनंदन ॥ वरो भवानभिम-
तो दुहितुर्मे श्रियःपते ॥४४॥ एवं समयमाकर्ण्य बद्ध्वा परिकरं प्रभुः ॥ आत्मानं सप्तधा कृत्वा न्यगृह्णाल्लीलयैव तान् ॥४६॥
बध्वा तान् दामभिः शौरिर्भग्नदर्पान् हतौजसः ॥ व्यकर्षल्लीलया बद्धान् बालो दारुमयान् यथा ॥४७॥ ततः प्रीतः सुतां २६
राजा ददौ कृष्णाय विस्मितः ॥ तां प्रत्यगृह्णाद्भगवान् विधिवत्सदृशीं प्रभुः ॥४८॥ राजपत्न्यश्च दुहितुः कृष्णं लब्ध्वा प्रियं
पतिं ॥ लेभिरे परमानंदं जातश्च परमोत्सवः ॥४९॥ शंखभेर्यानकानेदुर्गीतवाद्यद्विजाशिषः ॥ नरा नार्यः प्रमुदि-
ताः सुवासःस्रगलंकृताः ॥५०॥ दशधेनुसहस्राणि पारिबर्हमदाद्विभुः ॥ युवतीनां त्रिसाहस्रं निष्कग्रीवसुवाससं ॥५१॥

25

समयः कृतः इमे गोवृषाः ॥४३॥ सप्तधाकृत्वेति ॥ बहूनां योषितां संपर्कः एवाहं संभोगयोग्यः स्यामिति सत्यां प्रत्यसा-
मर्थ्यप्रदर्शनार्थमात्मनः सप्तधाकरणं ॥४५॥ निष्कग्रीवाश्च ताः सुवाससश्च तासां युवतीनां च दासीनां ॥५१॥ अथ

सुपुण्यं पत्क्ररतुः त्वत्संचयास्मिन ॥२२॥३०॥ पंचमं मित्रविंदाविवाहमाह विंदानुविंदाविति द्वाभ्यां आवंत्यौ आवंतीराजानौ ॥३१॥ स्व
माहनग्नजिदिति ॥ कोशल्य आर्याध्याधिपतिः सत्यानामकन्याभवत् आसीत् ॥ देवीकांतमती नाग्नजितीति पित्रं:

धर्मायुयेमिकालिंदी सुपुण्यपर्वेसउज्ञिति ॥ वितन्वन् परमानंदं स्वानां परममंगलं ॥३४॥ विंदानुविंदावावंत्यौ दुर्योधनव
शानुगौ ॥ स्वयंवरे स्वभगिनीं कृष्णे सक्तां न्यषेधतां ॥३५॥ राजाधिदेव्यास्तनयां मित्रविंदां पितृष्वसुः प्रसह्य हृत
वान् कृष्णो राजन् राज्ञां प्रपश्यतां ॥३६॥ नग्नजिन्नाम कौशल्य आसीद्राजातिधार्मिकः तस्य सत्याभवत्कन्या देवी
नाग्नजिती नृप ॥३७॥ न तां शेकुर्नृपा वोढुमजित्वा सप्त गोवृषान् तीक्ष्णशृंगान् सुदुर्धर्षान् वीर्यगंधासहान् ख
लान् ॥३८॥ तां श्रुत्वा वृषजिल्लभ्यां भगवान् सात्वतां पतिः जगाम कौशल्यपुरं सैन्येन महता वृतः ॥३९॥ स कोश
ल्यपतिः प्रीतः प्रत्युत्थानासनादिभिः ॥ अर्हणेनापि गुरुणा पूजयन् प्रतिनंदितः ॥४०॥ वरं विलोक्याभिमतं समा
गतं नरेंद्रकन्या चकमे रमापतिं ॥ भूयादयं मे पतिराशिषो मलाः करोतु सत्या यदि मे धृतो व्रतैः ॥४१॥ यत्पादपंक
जरजः शिरसा बिभर्ति श्रीरब्जजः सगिरिशः सह लोकपालैः ॥ लीलातनुः स्वकृतसेतुपरीप्सया यः काले दध
त्स भगवान् मम केन तुष्येत् ॥४२॥ अर्चित्वा पुनरित्याह नारायण जगत्पते ॥ आत्मानंदेन पूर्णस्य करवाम किमल्प
कः ॥४३॥ श्रीशुक उवाच ॥ तमाह भगवान् कृष्णः कृतासनपरिग्रहः ॥ मेघगंभीरया वाचा सस्मितं कुरुनंदन ॥४०॥

न्नाप्रसिद्धासत्यर्थिः ॥२४॥ वीरस्यशंधर्मपिनसहंत इतिनयाचान्त स्वलान् दुर्बलता ॥ रषान नपतिये स्नेनलभ्यां ॥
३३ प्रतिनंदितः संप्रतिनंदितवान् ॥ श्रीकृष्णेन वासः प्रतिनंदितः ॥४०॥ श्रीरामकृष्ण ॥ श्रीरामकृष्ण ॥ श्रीरामकृष्णः ॥

दे.५०

नुनवषिष्टिनमे भौमं हत्वा तेनाहृता हरिः कन्याः सहस्रशः प्राप पारिजातं दिवो हरन् ॥१॥ परिणीय तत्ताभिः तन्मनोरथपूरः
तोः आत्मारामो ध्यसौ तेभिन्न गृहेषु गृहस्थवत् ॥२॥ यन्त्राः स्त्रियो निरुद्धाः स भौमः चकारानुयेन कारणेन हतः तदाच
क्ष्वेति ॥ १ ॥ इंद्रेण भौमविचेष्टितं विज्ञापितेः सन् प्राग्ज्योतिषपुरं भौमनगरं ययाविति विदित्वान्वयः ॥ कथं भूतेन हृतं छत्रं
यस्य तेन ॥ लोकपालप्रधानत्वादिंद्रस्य वरुणछत्रहरणेपि तस्यैवमानभंग इति तथोक्तं ॥ हृते कुंडले यस्याः सादितिर्बंधुर्माता
यस्य तेन हृतममराद्रेः स्थानं सारणपर्वतलक्षणं यस्य तेन ॥ २ ॥ सत्यभामायाश्चेहे भगवंतमिंद्र आगस्य विज्ञापितेवान्
२१

॥ राजोवाच ॥ यथा हतो भगवता भौमो येन च ताः स्त्रियः ॥ निरुद्धा एतदाचक्ष्व विक्रमं शार्ङ्गधन्वनः ॥ १ ॥ श्रीशुक उवा
च ॥ इंद्रेण हृतछत्रेण हृतकुंडलबंधुना ॥ हृतामराद्रिस्थानेन ज्ञापितो भौमचेष्टितं ॥ २ ॥ सभार्यो गरुडारूढः प्रा
ग्ज्योतिषपुरं ययौ ॥ गिरिदुर्गैः शस्त्रदुर्गैर्जलाग्न्यनिलदुर्गमं ॥ ३ ॥ मुरपाशायुतैर्घोरैर्दृढैः सर्वत आवृतं ॥ ग २१
दया निर्बिभेदाद्रीन् शस्त्रदुर्गाणि सायकैः ॥ ४ ॥ चक्रेणाग्निं जलं वायुं मुरपाशांस्तथासिना ॥ शंखनादेन यंत्रा
णि हृदयानि मनस्विनां ॥ ५ ॥ प्राकारं गदया गुर्व्या निर्बिभेद गदाधरः ॥ पांचजन्यध्वनिं श्रुत्वा युगांताशनिभीषणं ॥
॥ ६ ॥ मुरः शयान उत्तस्थौ दैत्यः पंचशिरा जलात् ॥

२८

मदा अस्याः कौतुकाय भार्यया सह यथा विनितयद्भावदनुसस्यैव त्वत्पुत्रं हनिष्यामीति हासोक्तं भूम्यैव वरं दत्तं सत्यं कर्तुं
सत्यभामाया भूम्यंशत्वात्तया सह ययौ ॥ यद्वा नारदानीतपारिजातैककुसुमे रुक्मिण्यै दत्ते सति कुपिता सत्यभामा
सांत्वयतानुभयं पारिजातमेव दास्यामीति श्रीकृष्णेन प्रतिश्रुतमिति हरिवंशप्रसिद्धं ॥ तदर्थं तं नीतवानिति ज्ञेयं ॥ गरुडेन
यानेकारणं गिरिदुर्गैरित्यादिसरूपलक्षितं जलाग्न्यानिलैश्च सर्वतो वन्हीमानैर्दुर्गमं ॥ ३ ॥ ५ ॥ युगांताशनेर्ध्वनिवद्भीषणं परि

नागात् नागेभ्यः शतगुणान् नवलक्षाणि स्यात् रथेभ्यः शतगुणान् नवकोटीः अश्वान् अश्वेभ्यः शतगुणान् नवपद्मानि ॥५१॥५२॥
यदुभिर्गोवृषैश्च भग्नवीर्या अपि सुदुर्मर्षा रुरुधुः ॥५३॥ प्रस्यतः क्षिपतः प्रयुञ्जानानित्यर्थः ॥५४॥५५॥ सप्तमं विवाहमाह श्रुतकी-
र्तेः पितृष्वसुः श्रुतकीर्त्तिनाम्न्याः पितृस्वसा तस्याः सुतां भद्रां नाम तां कैकेयीं तद्देशादजा ॥५६॥ अष्टममाह सुतां चेति एक एव सन् [illegible]

नवनागसहस्राणि नागाच्छतगुणान् रथान् ॥ रथाच्छतगुणानश्वान् अश्वाच्छतगुणान्नरान् ॥५१॥ दंपती रथमारोप्य मह-
त्या सेनया वृतौ ॥ स्नेहप्रक्लिन्नहृदयो यापयामास कोशलः ॥५२॥ श्रुत्वैतद्रुरुधुर्भूपा नयंतं पथि कन्यकां ॥ भग्नवीर्याः
सुदुर्मर्षा यदुभिर्गोवृषैः पुरा ॥५३॥ तानस्यतः शरव्रातान् बंधुप्रियकृदर्जुनः ॥ गांडीवी कालयामास सिंहः क्षुद्रमृगानिव
॥५४॥ पारिबर्हमुपागृह्य द्वारकामेत्य सत्यया ॥ रेमे यदूनामृषभो भगवान् देवकीसुतः ॥५५॥ श्रुतकीर्तेः सुतां भद्रा-
मुपयेमे पितृष्वसुः ॥ कैकेयीं भ्रातृभिर्दत्तां कृष्णः संतर्दनादिभिः ॥५६॥ सुतां च मद्राधिपतेर्लक्ष्मणां लक्षणैर्यु-
तां ॥ स्वयंवरे जहारैकः स सुपर्णः सुधामिव ॥५७॥ अन्याश्चैवंविधा भार्याः कृष्णस्यासन् सहस्रशः ॥ भौमं हत्वा त-
न्निरोधादाहृताश्चारुदर्शनाः ॥५८॥ इति श्रीभागवते महापुराणे दशमस्कंधे अष्टमहिष्युद्वाहो नामाष्टपंचाशत्तमो

लक्ष्मणां जहार ॥५७॥ तस्य निरोधेन पुरं तस्मात् ॥५८॥ रुक्मिणी जांबवती भामा सत्या भद्रा च लक्ष्मणा कालिंदी मि-
त्रविंदा चेत्यष्टौ यदुपतेः स्त्रियः ॥५८॥ इति दशमे अष्टपंचाशत्तमः ॥५८॥ श्री श्री श्री श्री श्री। श्री श्री श्र
रो

॰त्वा स्मर्थे रणे कृष्णद्वेहमिसंवाधनं ॥ तथा शि ॥ मे यानि प्रयुक्तानि शस्त्राण्यस्त्राणि तत्र पौः सर्वमेव तत्सैन्यं संविहत्य पतत्रिशस्त्राण्य
स्त्राणि च चिच्छेद तत्रायके कं शस्त्रमस्त्रमस्त्रं च तानि भिः त्रिभिः शरैर्वित्योऽस्य यं ॥ १७ ॥ किं च गरुत्मतेतेति ॥ १८ ॥ तं पतः पयाशस्त्या

निहत्य बाहुना शिरो प्रविश्य हं चकार तद्यवतास्थकं जरं ॥ १९ ॥ यानि योधैः प्रयुक्तानि शस्त्राणि किं करुद्वह ॥ हरिस्तान्यच्छिनज्जी
२८ ह्नोः शरैरेकैकशस्त्रिभिः ॥ १९ ॥ उह्यमानैः सुपर्णेन पक्षाभ्यां निघ्नतो गजान् ॥ गरुत्मता हन्यमाना तुंडपक्षनखैर्गजाः ॥ २० ॥
पुरमेवा विशन्नातो नरको युध्य युध्यत ॥ दृष्ट्वा विद्राविंतं सैन्यं गरुडेनार्दितं स्वकं ॥ २१ ॥ तं भौमः प्राह रे छत्रपा वज्रः प्रतिहतो
पतः ॥ नाकपत तया विष्णोमाताहमस्ववधिपः ॥ २२ ॥ स्खलभौमोच्युतं हनुमाददे विनयोद्यम ॥ तद्विसर्गात्स्वर्गमेव नरकस्य
शिरोहरित ॥ ॰प्रयाह रज जस्य सुस्य चक्रेण लुत्मेभिना ॥ २३ ॥ सकुण्डले चारु किरीटभूषणं वभौ पपि व्यापतितं समुज्ज्वल २८
लं ॥ हाहेति माधवेत्युषयः सुरेश्वरा माल्यैर्मुकुंदं विकिरंतऽऽडिरे ॥ २४ ॥ ततस्त्व भूः कुम्भमुपेत्य कुंडले प्रतप्तजांबूनदरत्न
भास्वरे ॥ सवे जपं त्यावन वालपार्थ्यय तत्प्रा चेत संछत्र मयो महामणिं ॥ २५ ॥ प्रस्तोषाद्य विश्वेशं देवी देववरा च्युतं
प्रांजलिः प्रणताराजन् भक्तिप्रवणया धिया ॥ २६ ॥
२७

वज्रः प्रतिहतः प्रतिस्ता भवः ॥ प्रसौ गरुडस्तु नाकपत ॥ २० ॥ गरुडेनावितयोद्यमः सत ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ प्रतप्तजांबूनदे
याम्नरत्नानिभेभास्वरे ॥ मेरो धर्मभृतं छत्रं मंदराग्रिशिखरं मेम हामणिं चार्पीदिति ॥ २६ ॥

ग्न्याविध्य ग्न्यातिल्पसमस्ताद्नादद्रूत्पन्वय ॥ ५ ॥ नस्मैश्चाक्षिप्यायगदांव्यमुंचत ॥ ६ ॥ इंद्रितेजसावज्रेणग्नातिक्षिपयाहेतुमसयाग्न्यप्रम
र्धजुष ॥ ११ ॥ पीठं पीठनामानं निरशेन निरगामन ॥ १२ ॥ निहन्ता निर्शी धीदी निवेषांतान ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ तान धृ्ताणाक्ति विशेषांविचित्रा

त्रिशूलमुद्यम्यसहुर्निरीक्षणेण्युगांतस्यानलरोचिरुल्वणः ॥ ग्रसंस्त्रिलोकीमिवपंचभिर्मुखैरभ्यद्रवत्तार्क्ष्यसुतंपयोरगः ॥ ८ ॥
ग्न्याविध्यशूलेनरसांगरुत्मतिनिरस्यवक्त्रैर्व्यनदत्सपंचभिः ॥ स्वं रोदसी सर्वदिशोंवरंमहानापूरयन्नंडकटाहमावृणोत ॥ ९ ॥
तदापतद्वैत्रिशरवंगरुत्मतेहरिः शराभ्यामछिनत्त्रिधोजसा ॥ मुखेषुतंचापिशरैरताडयत्तस्मैगदांसोपिरुषाव्यमुं
चत ॥ १० ॥ तामापतंतींगदयागदांमृधेगदाग्रजो निर्विभिदेसहस्रधा ॥ उद्यम्यबाहूनभिधावतोजितः शिरांसिचक्रेण
जहारलीलया ॥ ११ ॥ व्यसुः पयातोंभसिकृत्तशीर्षोनिकृत्तशृंगोद्रिरिवेंद्रतेजसा ॥ तस्यात्मजाः सप्तपितुर्वधातुराः प्र
तिक्रियामर्षजुषः समुद्यताः ॥ १२ ॥ ताम्रोंतरिक्षः श्रवणो विभावसुर्वसुर्नभस्वानरुणश्चसप्तमः ॥ पीठंपुरस्कृत्यचमूपतिंमृधे
भौमप्रयुक्तानिरगान्धृतायुधाः ॥ १३ ॥ प्रायुंजतासाद्यशरानसीन्गदाशक्त्यृष्टिशूलान्यजितेरुषोल्वणाः ॥ तच्छस्त्रकू
टंभगवान्स्वमार्गणैरमोघवीर्यस्तिलशश्चकर्तह ॥ १४ ॥ तान्पीठमुख्याननयद्यमक्षयंनिकृत्तशीर्षोरुभुजांघ्रि
वर्मणः ॥ स्वानीकपानच्युतचक्रसायकैस्तथानिरस्तान्नरको धरासुतः ॥ १५ ॥ निरीक्ष्यदुर्मर्षणग्न्यास्रवन्मदैर्गजैः
पयोधिप्रभवैर्निराक्रमत ॥ दृष्ट्वासभार्यंगरुडोपरिस्थितंसूर्योपरिष्टात्सतडिद्घनंयथा ॥ १६ ॥ कृष्णंससतस्मैव्यसृज
च्छतघ्नींयोधाश्चसर्वेयुगपत्स्मविव्यधुः ॥ तद्भौमसैन्यंभगवान्गदाग्रजो विचित्रवाजैर्निशितैः शिलीमुखैः ॥ १७

वाजाः पत्रात्लिपेपातेवीरेलेर्निकृत्तावाहवः ॥ उरवः शिरोग्रीवाः कंधराः विग्रहस्यदेहायस्पतन्त्रनर्पेवंतपदाविवधुः

ननु गुणा विश्वोत्पत्त्यादिहेतवस्ते च प्रधानस्यैव तस्य च पुरुषः क्षोभकः तत्र च कालो निमित्तमिति प्रसिद्धं किमत्र त्वत्त्वा
इति । नमसो धारणे प्युपसंवृत्त एवस्थानाय पालनाय जगतः स्रष्ट्याद्यर्थमुक्तं रजआदित्वमेव । विभर्षि सजसी त्यर्थः ॥
कालप्रधानपुरुषाख्यस्य सर्वव्यतिरिक्ताः नसंति । चेत्तु परः सर्वव्यतिरिक्तस्त्व तत्त्वमेव जगदिति तत्त्वर्थः ॥ २८ ॥ कार्यकारणप्रपंच
स्य तदव्यतिरेकं तस्य च सर्वव्यतिरेकमुपपादयति । ब्रह्मेति । ब्रह्म भूमिः मात्राणि तिलद्द्वा मन इति इंद्रियाणीति त्रि

त्त्वैवैकस्त्वं रजउत्कटत्वेभोत्तमो निरोधाय विभर्षि संवृतः । स्थानाय सत्त्वं जगतो जगत्पते कालः प्रधानं पुरुषो भवान्परः
२९ ॥ २९ ॥ ब्रह्मपयोज्योतिरथानिलो नभो मात्राणि देवा मन इंद्रियाणि च । कर्ता महानित्यखिलं चराचरं त्वय्यद्वितीये
भगवन्नयं भ्रमः ॥ ३० ॥ तस्यात्मजोयं तव पादपंकजं भीतः प्रपन्नार्तिहरोपसादितः । तत्पालयैनं कुरु हस्तपंक
जं शिरस्यमुष्याखिलकल्मषापहं ॥ ३१ ॥ श्रीशुक उवाच । इति भूम्यार्थितो वाग्भिर्भगवान्भक्तिनम्रया ॥ २९
दत्वाभयं भौमगृहं प्राविशत्सकलर्द्धिमत् ॥ ३२ ॥ तत्र राजन्यकन्यानां षट्सहस्राधिकायुतं । भौमाहृतानां
विक्रम्य राजभ्यो ददृशे हरिः ॥ ३३ ॥ तं प्रविष्टं स्त्रियो वीक्ष्य नरवीरं विमोहिताः । मनसा वव्रिरेभीष्टं पतिं दैवो
20 पसादितं ॥ ३४ ॥ भूयात्पतिरयं मह्यं धाता तदनुमोदतां । इति सर्वाः पृथक्कृष्णे भावेन हृदयं दधुः ॥ ३५ ॥ त्र

विधाहंकारकार्यत्वात् लोककर्ताहंकारः ॥ ३० ॥ [illegible] ॥ एवं स्तुत्वा प्रार्थयते तस्येति प्रपन्नार्तिहर तस्य नरकस्यायं भग
दत्तो नाम पुत्रो भीतः ॥ ३१ ॥ एवमर्थितस्त्वात्पादपंकजमुपसादितः ॥ ३१ ॥ अभयं दत्वा ॥ ३२ ॥ शताधिकमित्यपि श्लोकं तथा ह श्री
पराशरः कन्याषोडशसहस्राणि षोडशातुलविक्रमः शताधिकानि ददृशे सहस्राणि महामनाः इति राज्यभ्यः सुपलं सै
वो लसिद्धादिभ्यश्चेति तथा हि तेनैव देवसिद्धासुरादीनां नृपाणां च जनार्दनः हृताहि सो सरः कन्या कृष्णेराधनिजमंदिरे ॥ ३३ ॥ ३५ ॥

तेम्बर्यसाध्याभूमः स्तौति॥नमस्त परमात्मन्देवाधीनर्थाभिर॥२५॥येनमंत्रेणाकृत्वा प्रसन्नः प्राप्तो येन मंत्रेण नमस्य
तिनम इति पंकजनाभो यस्य तस्मै जगत्कारणायेत्यर्थः॥प्रणत वसन् कीर्तिमयी पंकजमाला विद्यते यस्य तस्मै॥एवं
भूते ध्यायतां पंकजवत्सु प्रसन्नेता यो यथा मे मनेनेत्रे यस्य तस्मै पंकजवत्सुसेव्यौ पंकजांकितौ वा अंघ्री यस्य तस्मै नमद्
ति॥२६॥किंच॥भगवते निरतिशयैश्वर्याय वासुदेवाय सर्वभूतात्मना॥प्रणतं वदि ह्मवेव्या येनेन हि सर्वाश्रयत्वं परिच्छिन्न
स्यसंभेता तिकुलः सर्वाश्रयत्वं तत्राह पुरुषाय सर्वस्मात्कायात् एवं भवसने॥एवं भवाहमि हसामिति तत्पुरुषस्य पुरु

॥भूमिरुवाच॥ नमस्ते देवदेवेश शंखचक्रगदाधर॥ भक्तेच्छोपात्तरूपाय परमात्मन्नमोस्तुते॥२५॥ नमः पंकजनाभाय
नमः पंकजमालिने॥ नमः पंकजनेत्राय नमस्ते पंकजांघ्रये॥२६॥ नमो भगवते तुभ्यं वासुदेवाय विष्णवे॥ पुरुषा
याद्दिवीआय एणीवो धायते नमः॥२७॥ प्रजापजननपित्रे स्य ब्रह्मणेऽनन्तशक्तये॥ परावरात्मन् भूतात्मन् परमा
त्मन् नमोस्तुते॥२८॥

षत्वमिति श्रुते॥ एतदपि कुतः॥ आदिबीजाय॥ आदेर्जगत्कारणस्यापि कारणाय एवमपि नमः द्रादि देवजाड्यमित्याह सर्वे
धायेति॥२७॥ नन्वेवमपि स्वकारणान्तरं येन सत्त्वं स्यादत आह॥ प्रजापेति॥ स्वयमजास्य च जननपित्रे अतएव पित्र
मेण हेतुद्वयं ब्रह्मणे ब्रह्मतेनानन्तशक्तये इति च ब्रह्मचादतनं स्वभनं तशक्तिस्यात् जनपितृत्वमित्यर्थः॥ ननु पित्रा
दयः पुत्रादीनां जनकास्तेषां मतरं वतेषां भूतानितेषां च स्वकर्मद्वारेण जीवाः॥ किमत्राह तत्राह परात्मन्नित्यादि
पित्राद्यात्मकत्वाच्च मेव जनक इत्यर्थः॥२८॥

ग्धनुरागमहासस्मितमवलोकं चतुरं वक्रनवसंगमं च तत्तज्जल्पं च तस्मिन्नभ्यज्ञो विभेजः ॥४५॥ विश्रमणं संवाहनं केश
प्रसाधनं दासीनां शतानि विधत्ते यासां तथाभूता अपि स्वयं यथा भोक्तृस्यं विदधुरिति ॥४६॥ इति दशमे एकोनषष्टि
तमः ॥५९॥ अथ षष्टितमे कृष्णः परिहासेन रुक्मिण्याः कोपयित्वा ततः प्रेमकलहं नाम सांत्वयत ॥१॥ रामाराम
मनानंदमहोदयादिडैवते ॥ रुक्मिण्या प्रेमकलह ष्यनेन स्वयमीप्यते ॥२॥ स्वतल्पस्थं स्वपर्यंकस्थं ॥ कृष्णम्

इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोऽपि न वपुः विदुर्पदीषं ॥ भेजुर्मुदाविरतमेधितयानुरागहासाव
२० लोकनवसंगमजल्पलज्जा ॥४५॥ प्रत्युद्गमासनवरार्हणपादशौचताम्बूलविश्रमणवीजनगंधमाल्यैः ॥ केशप्र
सारस्नापनस्नपनोपहार्यैर्दासीशता अपि विभोर्विदधुः स्म दास्यं ॥४६॥ इति श्रीभागवते महापुराणे दशमस्कं
धे पारिजातहरणे एकोनषष्टितमोऽध्यायः ॥५९॥ श्रीबादरायणिरुवाच ॥ कर्हिचित्सुखमासीनं स्वतल्पस्
थं जगद्गुरुं ॥ पतिं पर्यचरद्भैष्मी व्यजनेन सखीजनैः ॥१॥ यस्त्वेतल्लीलया विश्वं सृजत्यत्त्यवतीश्वरः ॥ स हि जा
तः स्वसेतूनां गोपीथाय यदुष्वजः ॥२॥ तस्मिन्नंतर्गृहे भ्राजन्मुक्तादामविलंबिना ॥ विराजिते वितानेन दीपैर्मणिम
यैरपि ॥३॥ मल्लिकादामभिः पुष्पैर्द्विरेफकुलनादिते ॥ जालरंध्रप्रविष्टैश्च गोभिश्चंद्रमसोऽमलैः ॥४॥ पारिजातव
नामोदवायुनोद्यानशालिना ॥ धूपैरगुरुजै राजन्जालरंध्रविनिर्गतैः ॥५॥ श्री श्री श्री ॥ रामनारायण ॥

लं स्वकान्ताय यः ॥ श्रीकृष्णमेव परमप्रेमसंभावयितुं तस्यांतमेव तस्य मनुस्मारयतीत्याह त्रिभिः श्लो
कैर्मंदिरमनुवर्णयति तस्मिन्निति ॥ तदेव नातिप्रसिद्धत्वमाह भ्राजन्तीनि मुक्तादामानि तेषां विलंबाः संति यस्मिंस्ते
न वितानेन विराजिते ... पतनेन विराजिते यदनान्वयः सुगंधेन द्विरेफकुलेन नादिते प्रविष्टैश्चंद्ररश्मिभिर्निशि

प्राहिणोत्प्रस्थापयामससुमृष्टाः कमना पाश्वमावि रजांवराश्वतानरपानैः पिष्टिकाभिः प्रपिचमहोकोमानिति ३६
प्रत्यग्रियः सत्यभामासहितः ३९ ॥ गृहे घ्यानैनिकः मुपशोभयन्निय संद्धानविबुधानंनिर्जित्येति प्रक्रमयोः संग्रा
मउक्तः ४१ । ४२ तत्र ननुकथं प्रसादितसुमनोरथेन श्रीकृष्णेन महेंद्रस्य सं ग्राम इत्याशंक्याह पयाचइति प्रचुत
मर्य साधमेमिति चकमेदयं पचेतिघातोः विग्रहेन विग्रहं करोतिमहानपितमः क्रोधः प्राप्तानधनिकंतां

ताः प्राहिणोत्तद्वारवतीं सुमृष्टविरजांवराः ॥ नरयानैर्महाकोशानस्याम्थानद्रविणंमहत् ३६ ॥ ऐतवत्कले भा
श्चचतुर्दशानजरस्थिन ॥ पौडपश्चचलः षष्ठिप्रेषयामासकेशवे ३७ ॥ गत्वासुरेंद्रभवनंदत्वादित्यै चकुंड
ले ॥ पूजितस्त्रिदशेंद्रेण महेंद्राण्याचसप्रियः ३८ ॥ नोदितोभार्ययोत्पाद्यपारिजातं गरुत्मति ॥ आरोप्य
संद्धानविबुधान्निर्जित्योपानयत्पुरं ३९ स्थापितः सत्यभामायागृहोद्यानोपशोभनः ॥ अन्वगुर्भ्रम
राः स्वर्गात्तद्गंधासवलंपटाः ४० ॥ ययाचआनम्यकिरीटकोटिभिः पादौस्पृशन्नच्युतमार्थसाधनं ॥ सि
द्धार्थ एतेनविगृह्यतेमहानहोसुराणांचतमोधिगाढ्यतां ॥ ४१ ॥ अथोमुहूर्त्तएकस्मिन्नानागारेषुताः स्त्रि
यः ॥ यथोपयेमेभगवानतावद्रूपधरोव्ययः ४२ गृहेषु तासामनपाय्यतर्क्यकृन्निरस्तसाम्यातिशये
ष्ववस्थितः ॥ रेमेरमाभिर्निजकामसंप्लुतोयथेतरोगार्हकमेधिकांश्चरन् ॥ ४३ ॥ श्रीनारायणनमः ॥ श्री

धिमिति च ४३ यथायथावत् प्रनेनदेवकारादिवंधुजनसमागमोपि प्रतिगृहयोगपधेनस्वचितः अव्ययः
नर्वधापिसंपूर्णएव ४३ अथ हुभार्यनारत्नाभिस्याहरनिभिः गृहेष्वति अथतर्क्यं कर्माणिकरोतीति

किंन निष्किंचना इति ॥१४॥ आत्मसमं परस्परमनुरूपं जन्मैश्वर्याभ्यां सहितं आकृतिः रूपं जातिर्वा समाभवः आपत्तिः
नदीर्घसमीक्षा अविचारो यस्यास्तया ॥१५॥ अथ इदानीमपि ॥ नहि किमित्यत आह मिमिचैत इत्याशयेनाह ॥ चैद्येति म
मम द्विषंति स्मयनुत्तये गर्वापनयनाय ॥१९॥ स्त्रीणामतिदुःसहमौढ्यात्सीम्यमकामत्वमाह ॥ उदासीना इति देहगेहयोः उदा:

निष्किंचना वयं शश्वन्निष्किंचनजनप्रियाः ॥ तस्मात्प्रायेण नह्याढ्या मां भजंति सुमध्यमे ॥१४॥ ययोरात्मसमं वित्तं जन्मैश्वर्या
कृतिर्भवः ॥ तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित् ॥१५॥ वैदर्भ्येतदविज्ञाय त्वयादीर्घसमीक्षया ॥ वृता वयं गुणैर्हीना भि
३१ क्षुभिः श्लाघिता मुधा ॥१६॥ अथात्मनोनुरूपं वै भजस्व क्षत्रियर्षभं ॥ येन त्वमाशिषः सत्या इहामुत्र च लप्स्यसे ॥१७॥ चैद्य
शाल्वजरासंधदंतवक्त्रादयो नृपाः ॥ मम द्विषंति वामोरु रुक्मी चापि तवाग्रजः ॥१८॥ तेषां वीर्यमदांधानां दृप्तानां
स्मयनुत्तये ॥ आनीता मासि भद्रे तेजोपहरतासतां ॥१९॥ उदासीना वयं नूनं न स्त्र्यपत्यार्थकामुकाः ॥ आत्मलब्ध्या
स्महे पूर्णा गेहयोर्ज्योतिरक्रियाः ॥२०॥ श्रीबादरायणिरुवाच ॥ एतावदुक्त्वा भगवानात्मानं वल्लभामिव ॥ मन्य ३१
मानामविश्लेषात्तद्दर्पघ्न उपारमत् ॥२१॥ इति त्रिलोकेशपतेस्तदात्मनः प्रियस्य देव्यश्रुतपूर्वमप्रियं ॥ आश्रुत्य
भीता हृदि जातवेपथुश्चिंतां दुरंतां रुदती जगाम ह ॥२२॥

30

वयं
साना: अत एव ज्योतिरक्रियाः ज्योतिः प्रदीपादिवत्साक्षिमात्रतया क्रियारहिताः आस्महे वर्त्तामहे इति ॥२०॥२१॥
अविश्लेषाद्धेतोः आत्मानमेवेत्येवार्थे इवशब्दः ॥२२॥

पयसः फेनस्त्वेकेन इत्वम्दुनि पर्यंके कस्य कशिपुजभे हंसतूलिकायां उपतस्थे प्रासेवत ॥६॥७॥ सदेवी अभिनयति वालव्यजनमि
ति ॥ उपाच्युतमच्युतस्य समीपे सा मणिनूपुराभ्यां विरेजे कूपति मणिमयो नूपुरौ कूजयन्ती अंगुलीयवलयव्यजनानि अग्र
हस्ते यस्याः सा वस्त्रान्तेन गूढौ स्थगितौ कुचौ तयोः कुंकुमं तेन शोणो हारस्तस्य भासा नितंबे धृतया परार्ध्यः
श्रेष्ठया कांच्या च विरेजे ॥९॥ तां निरीक्ष्य प्रीतः सन् स्मयमानो हरिराबभाषे कथंभूतां या लीलया धृततनुस्तस्यानु
रूपं रूपं यस्याः सा ॥ यथोक्तं श्रीपराशरेण देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी । विष्णोर्देहानुरूपां वै करोत्येवात्मनस्तनुमिति ॥

पयःफेननिभे शुभ्रे पर्यंके कशिपूत्तमे ॥ उपतस्थे सुखासीनं जगतामीश्वरं पतिं ॥६॥ वालव्यजनमादाय रत्नदंडं सखीकरा
त् ॥ तेन वीजयती देवी उपासांचक्र ईश्वरं ॥७॥ सोपाच्युतं क्वणयती मणिनूपुराभ्यां रेजेंगुलीयवलयव्यजनाग्रहस्ता ॥ व
स्त्रांतगूढकुचकुंकुमशोणहारभासा नितंबधृतया च परार्ध्यकांच्या ॥८॥ तां रूपिणीं श्रियमनन्यगतिं निरीक्ष्य या लील
या धृततनोरनुरूपरूपा ॥ प्रीतः स्मयन्नलककुंडलनिष्ककंठवक्त्रोल्लसत्स्मितसुधां हरिराबभाषे ॥९॥ श्रीभगवानुवाच ॥ राज
